# काव्यशास्त्रग्रन्थेषु रसविवेकः

डॉ. कृष्णकुमारकुमावतः
सहायकाचार्यः विभागाध्यक्षश्च -संस्कृतम्
राजकीयमहाविद्यालयः, राजसमन्दः (राजस्थानम्)
krishankumarkumawat5689@gmail.com

भाषायां व्युत्पत्तिवर्धनाय यथा व्याकरणशास्त्रकमपेक्षते तथैव काव्ये दक्षतायै लक्षणग्रन्थानामावश्यता भवत्येवेति सर्वसम्मतः पक्षः । अलंकारशास्त्रस्य ज्ञानं विना केवलं काव्ये नैपुण्यमेव न सम्पद्यते अपितु योग्यताकांक्षासत्तियुक्तवाक्यनिर्माणेऽपि समर्थो न भवति । अतः काव्यरचनायामलंकारशास्त्रस्यातिमहत्त्वपूर्णं स्थानमामनन्ति सर्वे । प्राचीनकालादारभ्य वर्तमानकालपर्यन्तं बहवो हि अलंकारनिबन्धकर्तारोऽभवन् । ते च यथायथ क्रमेण भरतमुनि-मेधाविन्-धर्मकीर्ति-भट्टि-भामह-दण्डि-भट्टोद्भट्ट-वामन-रूद्रट-आनन्दवर्धन-मुकुलभट्ट-भट्टतौत-भट्टनायक-राजशेखर-अभिनवगुप्त-कुन्तक-महिमभट्ट-भोजराज-क्षेमेन्द्र-मम्मट्-रुय्यक-सागरनन्दी-वाग्भट्ट-हेमचन्द्र-अमरचन्द्र-देवेश्वर-धनञ्जय-रामचन्द्र-गुणचन्द्र-विद्याधर-विद्यानाथ-विश्वनाथ-केशवमिश्र-शारदातनय-सिंहभूपाल-भानुदत्तमिश्र-रूपगोस्वामि-अप्पयदीक्षित-पण्डितराजजगन्नाथ-नागेशभट्ट-विश्वेश्वर-नरसिंहप्रभृतयो मुख्यतमास्सन्ति ।

एतैः काव्यशास्त्रज्ञैः स्वस्वकाव्यशास्त्रेषु काव्यस्य स्वरूप-हेतु-रस-दोष-गुण-रीत्यलंकाराणां सविस्तरेण व्याख्या प्रस्तुता । परं कालान्तरे प्रसंगोऽयं बहुमहत्त्वपूणमभवत् यत् 'काव्यस्य क आत्मा ' इत्यस्मिन् विषये एवालंकारिकाणां मतवैभर्म्यमजायत । काव्यशास्त्रस्य सम्यकनुशीलनेनैव स्पष्टोऽयं जायते यत् अलंकारशास्त्रस्यानेके सम्प्रदाया आसन् । काव्यस्य आत्मतत्त्वं किमिति जिज्ञासानिवृत्तये केचिदलंकारं, केचिद् रसं, केचिद् रीतिं, केचिद् ध्वनिं, केचिदौचित्यं, केचिद् वक्रोक्तिञ्च काव्यस्यात्मतत्त्वेन प्रमाणयन्ति, स्वीकुर्वन्ति, स्थापयन्ति च । भरतमुनेरारभ्य कालक्रमेण समीक्षाभेदे विभिन्नशताब्दीषु नवीननवीनतरसम्प्रदायानामुत्पत्तिर्जाता । तथा चेदानीं यावत्प्रसिद्धिमुपगता अधोलिखितषट्सम्प्रदायाः -





- भरतमुनेः रससम्प्रदायः
- भामहोद्भट्टरूद्रटानाम् अलंकारसम्प्रदायः
- दण्डिवामनयोः रीतिसम्प्रदायः
- कुन्तकस्य वक्रोक्तिसम्प्रदायः
- आनन्दवर्धनाभिनवगुप्तयोर्ध्वनिसम्प्रदायः
- क्षेमेन्द्रस्य औचित्यसम्प्रदायः[i]

भरतादारभ्य पण्डितराजजगन्नाथपर्यन्तं सर्वे आचार्या एतेषु षट्सु सम्प्रदायेषु स्वस्यैकस्य पक्षस्य समर्थनं कुर्वन्ति पोषयन्ति मण्डयन्ति च । तथा चान्यस्य मतस्य कुत्रचितपेक्षितं तर्कानुसारं खण्डनमपि कुर्वन्ति । अलंकारसर्वस्यस्य टीकाकर्त्रा समुद्रबन्धनेन वैज्ञानिकरीत्या सम्प्रदायोदयस्य प्रक्रिया प्रदर्शिता यथा - " **इह विशिष्टौ शब्दार्थौ काव्यम्** । तयोश्च **वैशिष्ट्यधर्ममुखेन व्यापारमुखेन व्यंग्यमुखेन चेति त्रयः पक्षाः । आद्येऽप्यलंकारतो गुणतो वेति द्वैविध्यम् । द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेति द्वैविध्यम्। इति पञ्चसु पक्षेष्वाद्य उद्भटादिभिरंगीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चम आनन्दवर्धनेन** "।[ii] अत्र षष्ठमौचित्यसम्प्रदायस्याविष्कर्तुः क्षेमेन्द्रस्य चर्चा समुद्रबन्धनेन न कृता तथापि क्षेमेन्द्रस्य औचित्यसम्प्रदायोऽपि अतिप्रसिद्धः । पत्रेऽस्मिन् भरतमुनेः स्थापितस्य रससिद्धान्तस्य चर्चां करिष्यामहे। काव्यशास्त्रस्येतिहासे भरतमुनिरेव रससिद्धान्तस्य प्राचीनतमः प्रतिष्ठापक आचार्यः। तथापि राजशेखरेण काव्यमीमांसायां लिख्यते यथा " **रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः** "[iii] अर्थात् सर्वप्रथमं भरतेन रूपकाणां निरूपणं कृतम्, तथा च नन्दिकेश्वरेण रसानां निरूपणं कृतम् । नन्दिकेश्वरेण विरचितं ग्रन्थमिदानीं नोपलभ्यते । नाट्यशास्त्रे रूपकाणां रसानाञ्चोभयोः विवेचनं प्राप्यते अतः रससिद्धान्तस्य आद्य प्रवर्तक आचार्यो भरत एव विद्यते । वैदिककाले ऋग्वेदे रसशब्दस्योल्लेखः सोमरसस्यार्थे "दधानः कलशे रसम् " इति दृश्यते । तैत्तिरियोपनिषदि "रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति" एवं प्रकारेण आनन्दार्थेऽपि रसशब्दस्य प्रयोगो दृश्यते । भरतमुनिरपि रसानां ग्रहणमथर्ववेदादेव अकुरुत । यथा -

**जग्राह पाठ्यमृग्वेदात् सामेभ्यो गीतमेव च ।**

**यजुर्वेदादभिनयान् रसानाथर्वणादपि॥** [iv]

**"न हि रसादृते कश्चिदर्थः प्रवर्तते"** अर्थात् रसं विना कस्यचिदप्यर्थस्य प्रवर्तनं काव्ये न संभवति । अस्मिन्नैव प्रसंगे अभिनवभारतीटीकायां लिख्यते टीकाकारेण यथा- "एक एव परमार्थतो रसः सूत्रस्थानीयत्वेन रूपके प्रतिभाति"। अर्थात् रूपके रस एव सर्वत्र सूत्रवत् प्रतीयते । "रस समुदायो हि नाट्यम् । न नाट्य एव च रसाः काव्येऽपि" एवं प्रकारेण रसविषये भरतमुनिना स्वमतं प्रकटीकियते । व्याकरणशास्त्रदृष्ट्या रसपदस्य "रस्यते आस्वाद्यत इति रसः, रस्यते अनेन इति रसः, रसति रसयति वा रसः, रसनं रसः आस्वादः, इति व्युत्पत्त्यः प्रचलितास्सन्ति । काव्यपठनेन, श्रवणेन, लेखनेन, अभिनयदर्शनेन च यदानन्दं वयमनुभवामः स एव रसः इत्यपि विद्वांस आमनन्ति । रसस्वरूपविषये विश्वनाथः साहित्यदर्पणे ब्रूते यथा -

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः । वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥**

**लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः । स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥** [v]

आचार्यभरतेन नाट्यशास्त्रस्य षष्ठमेऽध्याये रसस्वरूपस्य रसानुभूतेश्च विवेचनं कृत्वा रससिद्धान्तस्य "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति मूलसूत्रमिदं प्रदर्शितम् । एतस्य रससूत्रस्यैवाशयमादाय उत्तरवर्तिनः मम्मटविश्वनाथादय आचार्या अपि रसनिष्पत्तिसिद्धान्तं प्रकटीकुर्वन्ति। विभावानुभावानाञ्च विशद् व्याख्यां कुर्वन्ति । यथा काव्यप्रकाशे -

**कारणान्यथ कार्याणि सहकारीणि यानि च ।**

**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥**

**विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।**

**व्यक्तः स तैर्विभावाद्यैः स्थायिभावः रसः स्मृतः ॥** [vi]

आशयो यथा जगति कारणानि कार्याणि सहकारीणि भवन्ति तथैव काव्येषु नाट्केषु च निरूपणानन्तरं जनैर्विद्भिर्वा क्रमशो विभावानुभावव्यभिचारिण उच्यन्ते । विश्वनाथेनापि साहित्यदर्पणे एवमेव रसनिष्पन्नता प्रतिपादिता यथा -





**विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।**

**रसतामेति रत्यादिः स्थायिभावः सचेतसाम्** ॥ [vii]

यद्यपि नाट्यशास्त्रस्य रससूत्रस्य विभावानुभावव्यभिचारिभावशब्दानां व्याख्यायां तु त्रिदुषां मध्ये मतैक्यं दृश्यते तथापि संयोगाद् तथा निष्पत्तिः इति पदद्वयस्य व्याख्याप्रसंगे पर्याप्तमात्रायां मतभिन्नता दृग्गोचरीभवति। तेषु मतेषु चत्वार एव सर्वतः प्रधाना । तेषां भट्टलोल्लट-शंकुक-भट्टनायक-अभिनवगुप्तपादनामानि अवगन्तव्यानि । रससम्प्रदाय एतेषामेव मतमदाय साम्प्रतं प्रचलति। चत्वारि मतानि संक्षेपेण यथा- भट्टलोल्लटस्योत्पत्तिवादः, अभिनवगुप्तेन नाट्शास्त्रस्य स्वकीयाभिनवभारतीटीकायां भट्टलोल्लटमतस्योल्लेखः कृतः, भट्टलोल्लटेनापि सम्भाव्यते यत् नाट्यशास्योपरि काचिद् टीका रचिता परं साम्प्रतं सा नोपलभ्यते । भट्टलोल्लटेन हि 'संयोगात्' इत्यस्य 'उत्पाद्य-उत्पादकसम्बन्धात्' इत्यर्थः तथा 'निष्पत्तिः' इत्यस्य 'उत्पत्तिः' इत्यर्थः व्याख्यातः । द्वितीयमतमस्ति शंकुकस्यानुमितिवादः। अस्य मतस्यापि उल्लेखोऽभिनवभारत्यामेव संप्राप्यते । शंकुको नैयायिकः सन् विभावादिसाधनेषु रसरूपसाध्येषु चानुमाप्यानुमापकभावं कल्पयतीति। अत्र 'संयोगात्' इत्यस्य पदस्य भावः 'अनुमाप्य अनुमापकसम्बन्धात्' तथा 'निष्पत्तिः' इत्यस्यार्थः 'अनुमितिः' इति चिन्तयति । रससम्प्रदायस्य तृतीयवादोऽस्ति भट्टनायकस्य भुक्तिवादः । भट्टनायकेन रससूत्रस्थ 'संयोगात्' इत्यस्य 'भोज्य-भोजकसम्बन्धात्' तथा 'निष्पत्तिः' इत्यस्य 'भुक्तिरित्यर्थः कृतः । उक्तञ्च काव्यप्रदीपे **"तस्माद्विभावादिभिः संयोगाद् भोज्यभोजकसम्बन्धात् रसस्य निष्पत्तिर्भुक्तिरिति सूत्रार्थः"** इति । भट्टनायकस्य मतं मम्मटेनापि काव्यप्रकाशे स्पष्टीक्रियते यथा -**"न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते "**। एवमेव भट्टनायकस्य रसानुभूतेः स्वरूपमभिनवगुप्तो ध्वन्यालोकस्य लोचनटीकायां कथयति यथा - **"भाविते च रसे तस्य भोगः योऽनुभवस्मरणप्रतिपत्तिभ्यो विलक्षणं एव द्रुतिविस्तरविकासात्मा रजस्तमोवैचित्र्यानुविद्धसत्त्वमयनिजचित्स्वभावनिर्वृतिविश्रान्तिलक्षणः परब्रह्मास्वादसविधः । स एव च प्रधानभूतोऽशः सिद्धरूप इति"** । चतुर्थवादोऽस्ति अभिनवगुप्तस्याभिव्यक्तिवादः । रससूत्रव्याख्यानसन्दर्भे व्यञ्जनावादिनोऽभिनवगुप्तस्यैवान्तिमं मतम् । अभिनवगुप्तोऽयं व्यञ्जनावादी ध्वनिवादी आलंकारिकश्च बभूव । अभिनवगुप्तो रससूत्रस्थ 'संयोगात्' इत्यस्य 'व्यंग्य-व्यञ्जकभावात्' तथा 'निष्पत्तिः' इत्यस्य 'अभिव्यक्तिरित्यर्थः कृतः । एतन्मतस्य

सारांशोऽस्ति यत् रसनिष्पत्तिः सामाजिकेषु भवति. स्थायीभावो वासनारूपेण सामाजिकेषु स्थिरतया तिष्ठति, साधारणीकृतविभावादिना स्थायीभावो विकसितो भवति। विभावादिसंयोगादव्यक्तरूपेणाभिव्यक्तो जायते, यथा जलबिन्दुनिपातेन मृतिकायाः गन्धस्याभिव्यक्तिर्भवति तद्वदेव ।

रसनिष्पत्तेः प्रक्रियानन्तरमिदानीं विभावादीनां स्वरूपनिरूपणं क्रियते । विभावविषये आचार्यभरतेन लिख्यते यत् "**विभाव्यतेऽनेन वागंगसत्त्वाभिनया इति विभावः । यथा विभावितं विज्ञातार्थमित्यर्थानन्तरम् ।।**[viii] कविराजविश्वनाथः साहित्यदर्पणे "**रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः** " इत्युक्त्वा विभावस्य द्वौ भेदौ स्वीकरोति । लिख्यते विश्वनाथेन "**आलम्बनोद्दीपनाख्यौ तस्य भेदावुभा स्मृतौ** [ix]" पुनः आलम्बनविभावस्य परिभाषा प्रदत्ता यथा – " **आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमात्** "[x] नायकनायकादीनालम्ब्य रसः प्रकर्षं प्राप्नोति । सर्वैः काव्यशास्त्रकारैः नायकनायकादीनां पृथक्-पृथक् संख्या निर्धारिता, लक्षणान्यपि च प्रदत्तानि। विभावस्य द्वितीयभेदस्योद्दीपनविभावस्यापि लक्षणं विश्वनाथेन प्रदत्तम् यथा – "**उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये। आलम्बनस्य चेष्टाद्या देशकालादयस्तथा ।।**"[xi] अर्थात् उद्दीपनविभावा आलम्बनविभावेनांकुरितं रसमुद्दीपयन्ति, परिताषातिशयं नयन्ति तैव उद्दीपनविभावाः कथ्यन्ते । एवमपि वक्तुं शक्यते यत् आलम्बनस्य नायकादेः चेष्टाद्याः भ्रूनेत्रविक्षेपादयः तथा देशकालादयश्च लोके कारणानि तैव काव्यनाट्ययोः उद्दीपनविभावा भवन्ति । द्वितीयोऽस्ति अनुभावः, अनु पश्चात् भवन्ति इति अनुभावाः । "**अनुभावो विकारस्तु भावसंसूचनात्मकः** "[xii] अर्थात् स्वैः कारणैरुत्पादितं रत्यादिस्थायीभावं बहिः प्रकटयन् लौकिकावस्थायां कार्यरूपः तथा काव्ये नाट्ये च निवेशितः सन् अनुभाव इत्युच्यते । स्थायिभावजन्यत्वम् अनुभावत्वमिति । अनुभावस्यापि प्रकारद्वयं भवति नायकनायिकादीनां शारीरिकचेष्टाभिः प्रकटयन् कटाक्षभुजक्षेपादयः तथा च नायकादीनां मनस उत्पन्नाः विकाराः यथा- "**स्तम्भः स्वेदोऽथ रोमाञ्च स्वरभंगोऽवेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः** ।।[xiii] एतदतिरिच्य रसतरंगिण्यां जृम्भा इति नवमः सात्त्विकभावोऽपि कल्पितः। लिख्यते रसतरंगिण्यां यथा – **जृम्भा च नवमः सात्त्विको भाव इति प्रतिभाति** [xiv]। अनुभावनिरूपणानन्तरं व्यभिचारिणः (सञ्चारिभावाः) प्रतिपादयितुमुपक्रम्यन्ते । **विविधाभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः**[xv] । ये विविधरसेष्वनुकलं भूत्वा विचरन्ति तैव सञ्चारिभावाः कथ्यन्ते





। एक एव व्यभिचारिभावोऽनेकेषु रसेषु भवितुं शक्नोति । अथवा एकस्मिन्नैव रसे अनेके व्यभिचारिभावा अपि भवितुं शक्नुवन्ति । **विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः । स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्विदाः** ।।[xvi] एते व्यभिचारिण इत्यवधेयं यथा स्थायिनि भावे कदाचिदुन्मग्नाः जलबुद्बुद्वत् झटिति प्रतीयमानत्वेन प्रादुर्भूताः, निर्मग्ना जलबुद्बुद्वच्च विलम्बप्रतीतिकरत्वेन पुनस्तिरोभूता भावा व्यभिचारिणः कथ्यन्ते [xvii] । विभावानुभावापेक्षया विशेषेण रसपुष्टिजनकभावत्वं व्यभिचारित्वमिति । त्रयस्त्रिंशद्व्यभिचारिभावा इति सर्वे आलंकारिका आमनन्ति। ते च यथा –

**निर्वेदावेगदैन्यश्रममदजडता औग्रयमोहौ विबोधः ।**

**स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः ।।**

**औत्सुक्योन्मादशंकाः स्मृतिमतिसहिता व्याधिसंत्रासलज्जा ।**

**हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः ।।** [xviii]

व्यभिचारिभावनिरूपणानन्तरमुद्देशकमप्राप्तः स्थायिभावोऽधुना निरूप्यते । स्थायिभावानां संख्यानिर्धारणे आलंकारिकाणां मतैक्यं नास्ति । मनोवृत्तिरूपा अष्टौ स्थायिभावाः शारदातनयेन भावप्रकाशने कथ्यन्ते यत् – **यतोऽष्टधा मनोवृत्तिः सभ्यानां नाट्यकर्मणि ।**

**अष्टावेवानुभूयन्ते तासूक्तास्तैः रसाः पृथक् ।।** [xix]

स्थायिभावाः मनुष्यहृदये चित्तवत्तिरूपेण दीर्घकालपर्यन्तमवस्थिता भवन्ति । स्थायिभावस्य कैश्चिदालंकारिकैः परिभाषाः प्रदत्ताः । यथा- **अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः । आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति संमतः ।।** [xx] प्रतिकुलभावाः अथवा अनुकूलभावाः यं भावं तिरोहितमक्षमाः भवन्ति सैव स्थायीभावरित्यर्थः। विषयेऽस्मिन् दशरूपकेऽपि लिख्यते धनिकधनञ्जयाभ्याम् – **विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः । आत्मभावं नयत्याशु स स्थायी लवणाकरः ।।** [xxi] नाट्यशास्त्रकारेणाचार्यभरतेन अष्टौ स्थायिभावाः स्वीकृताः । मम्मटः पृथक्तया निर्वेदमपि स्थायिभावं स्वीकृत्य नवमं शान्तरसं स्वीकरोति । यथा – **रतिर्हासश्च शोकश्च**

**क्रोधोत्साहौ भयं तथा । जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥** [xxii] **निर्वेदः स्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।** [xxiii] या स्थायिभावानां संख्या भवति सैव रसानामपि । रसाना संख्याविषये प्रायः सर्वेषामलंकारिकाणां पृथक्-पृथक् मतानि वर्तन्ते । यथा भरतमुनिना अष्टौ रसाः चिन्त्यन्ते। चोक्तं यथा – **शृंगारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुतसंज्ञौ चेत्यष्टौ रसाः स्मृताः ॥** [xxiv] आचार्यमम्मटमते नवरसाः भवन्ति । विश्वनाथो वत्सलतां स्थायिभावं स्वीकृत्य वत्सलनामकं दशमं रसमपि स्वीकरोति ।

**स्फुटं चमत्कारितया वत्सलं च रसं विदुः।**

**स्थायी पुत्रलतास्नेहः पुत्राद्यालम्बनं मतम् ॥** [xxv]

"उज्जवलनीलमणिः भक्तिरसामृतसिन्धुश्चेति" एतादृशेषु ग्रन्थेषु भगवद्विषयकरतिस्थायिभावयुक्तं भक्तिरसोऽपि प्राप्यते । एवं प्रकारेणाहत्य एकादशरसानामुल्लेखः काव्यशास्त्रग्रन्थेषु प्राप्यते । रसानां प्रधानता विषयेऽपि मतैक्यं न दृश्यते । यथा भोजेन शृंगारप्रकाशे शृंगारस्य तथा भवभूतिना उत्तररामचरिते 'एको रसः करुण एव' इति विलिख्य करुणरसस्य प्राधान्यमंगिकृतम् । अभिनवगुप्तः शान्तरसं रसेषु प्रधानतमं स्वीकरोति एवमेव साहित्यदर्पणकारेणाचार्यविश्वनाथेन अद्भुतरसः रसेषु मुख्यतमो मन्यते । ब्रूते यथा –

**रसे सारश्चमत्कारः सर्वत्राऽप्यनुभूयते ।**

**तच्चमत्कारसारत्वे सर्वत्राऽत्यद्भुतो रसः ॥**

**तस्मादद्भुतमेवाह कृती नारायणो रसम् ।** [xxvi]

अभिनवगुप्तः शान्तरसमेव सर्वेषां रसाणां मूलं कल्पयति । अभिनवभारत्यां लिख्यते यथा

**स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते ।**

**पुनर्निमित्तापाये च शान्त एवोपलीयते॥**

तथापि सर्वेषां रसानां महत्त्वं स्वस्वस्थाने दरीदृश्यते एव । भरतमुनिना प्रत्येकस्य रसस्य पृथक्-पृथक् देवतावर्णादिवश्चोद्यन्ते । यथा –





**श्यामो भवेत्तु शृंगारः सितो हास्यः प्रकीर्तितः । कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः ॥**

**गौरो वीरस्तु विज्ञेयः कृष्णश्चापि भयानकः । नीलवर्णस्तु बीभत्सः पीतश्चैवाद्भुतः स्मृतः ॥**

**शृंगारो विष्णुदैवत्यो हास्यः प्रथमदैवतः । रौद्रो रुद्राधिदेवश्च करुणो यमदेवतः ॥**

**बीभत्सस्य महाकालः कालदेवो भयानकः । वीरो महेन्द्रदेवः स्यादद्भुतो ब्रह्मदेवतः ।।**[xxvii]

रसेषु परस्परं विरोधिता अविरोधितापि भवति । "**इह खलु रसानां विरोधिताया अविरोधितायाश्च त्रिधा व्यवस्था । कयोश्चिदालम्बनैक्येन, कयोश्चिदाश्रयैक्येन, कयोश्चिन्नैरन्तर्येणेति । तत्र हास्यरौद्रबीभत्सैः सम्भोगस्य । वीरकरुणरौद्रादिभिर्विप्रलम्भस्य । आश्रयैक्येन च वीरभयानकयोः । नैरन्तर्यविभावैक्याभ्यां शान्त शृंगारयोः ।**"[xxviii] रसात्मकं वाक्यं काव्यं भवतीति प्रसिद्धमेव । एवमेव आस्वादयोग्यानां भावादीनां गणनापि रसेषु एवालंकारिकैः क्रियते। भावादिषु भाव-रसाभास-भावाभास-भावशान्ति-भावोदय-भावसन्धि-भावशबलतानाञ्चेति भेदानां परिगणना कृता काव्यशास्त्रज्ञैः। यथा- रसभावौ तदाभासौ भावस्य प्रशमोदयौ । सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः ॥ भावस्य लक्षणं क्रियते विश्वनाथेन यथा – **सञ्चारिणः प्रधानानि देवादिविषयाः रतिः । उद्बुद्धमात्रस्थायी च भाव इत्यभिधीयते।।** [xxix] अनौचित्यप्रवर्तिता रसाः रसाभासा भवन्ति । तथा च अनौचित्यप्रवर्तिता भावाः भावाभासा भवन्ति । मम्मटः साक्षात् त्रयोदशरसविरोधिनो दोषान् ब्रवीति । यथा –

**व्यभिचारिरसस्थायिभावानां शब्दवाच्यता ।**

**कष्टकल्पनया व्यक्तिरनुभावविभावयोः॥**

**प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।**

**अकाण्डे प्रथनच्छेदौ अंगस्याप्यतिविस्तृतिः ॥**

**अंगिनोऽननुसंधानं प्रकृतीनां विपर्ययः।**

**अनंगस्याभिधानं च रसे दोषाः स्युरीदृशाः ।।**[xxx]

**निष्कर्षः**

काव्यस्य आत्मनो विषये प्राचीनकालादारभ्य वर्तमानकालपर्यन्तं बहवो वादा अस्माकं दृष्टिपथे पथिकायन्ते । पर प्रायः आलंकारिकैः रस एव काव्यात्मा अंगीक्रियते । ध्वनिकारेणापि रसध्वनिः काव्यस्यात्मा मन्यते । लिख्यते च **रसभावतदाभासभावशान्त्यादिरक्रमः। ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः** ॥ प्रतिहारेन्दुना विरचितायां काव्यालंकारसारसंग्रहस्य लघुवृत्तिरिति नामधेयां टीकायां रस एव काव्यात्मा कथ्यते। लघुवृत्त्यनुल्लेखो प्राप्यते यत् **रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः। कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम्।।**[xxxi]एवमेव अभिनवगुप्त-भोजराज-मम्मट-रुय्यक-महिमभट्ट-राजशेखर-विश्वनाथ-कर्णपूर-भूदेव-केशवमिश्र-जगन्नाथादिभिः आलंकारिकैः रस एव काव्यात्मा अंगीक्रियते। अलंकारशेखरे केशवमिश्रेण लिखितं यत् **साधुपाके विना स्वाद्यं भोजने निर्लवणं यथा । तथैव नीरसं काव्यं स्यान्नो रसिकतुष्टये ।** [xxxii] न केवलं काव्यशास्त्रिया आचार्या एव रसस्य प्रधानत्वं स्वीकुर्वन्ति अपितु कालिदासबाणभवभूत्यादयो मूर्धन्याः कवयोऽपि रसस्यैव काव्येषु महाकाव्येषु च प्रधानत्वमामनन्ति । रसः काव्यस्यातिविशिष्टं तत्त्वं वर्तते । प्रबन्धकाव्यं रचयन् कविः रसपरतन्त्रं स्यात् । भगवत्यानन्दवर्धनोऽपि यथा –**कविना प्रबन्धमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम्** ।[xxxiii]

1 साहित्यदर्पणः आचार्यः कृष्णमोहनशास्त्री, [illegible] व्याख्या, चौखम्बा [illegible] , वाराणसी

[illegible]

[illegible] पृ. [illegible]

[illegible]

साहित्यदर्पणः 3.2

[illegible]

[illegible] 1.

[illegible] 6

[illegible] 3.29

[illegible]

[illegible] 3.131

[illegible]

[illegible] 2.32

[illegible] पृ.66





[illegible]

[illegible]

[illegible] चौखम्बा [illegible] , वाराणसी [illegible]

[illegible] 3.142

[illegible]

[illegible]

[illegible]

[illegible] 4.2

[illegible] 4.39

[illegible]

[illegible]

[illegible] वृत्तिभाग

[illegible] 42-43

[illegible] 2.5 [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] 3.14 [illegible]

डॉ. कृष्णकुमारकुमावतः
सहायकाचार्यः विभागाध्यक्षश्च -संस्कृतम्
राजकीयमहाविद्यालयः, राजसमन्दः (राजस्थानम्)
mobile no. 8377917640
krishankumarkumawat5689@gmail.com

# शब्दार्थसम्बन्धस्य स्वरूपं नित्यत्वञ्च

सुदीप-मण्डलः

उपोद्घातः

अष्टसु नवसु वा व्याकरणेषु त्रिमुनिप्रसिद्धस्य पाणिनीयव्याकरणस्य लौकिकवैदिकोभयविध-शब्दसाधुत्वप्रतिपादकत्वेन माहात्म्यमधिकं वर्तते। तत्र शब्दार्थयोः कश्चित् नित्यरूपः सम्बन्धः स्वीक्रियते। तथाहि घटमानय इत्यादिशब्दश्रवणात् समनन्तरं श्रोतुः आत्मनि समुपस्थीयते तत्तदर्थैः उदीयते च। ततः योग्यताकाङ्क्षासत्त्यादिवशात् तेषां परस्परं विशिष्टान्वयबोधेन पदजन्यपदार्थोपस्थितिः भवति। तत्र अन्यस्य उद्बोधकस्याभावात् शब्दश्रवणस्य च उपस्थितत्वात् तस्यैव तत्संस्कारबोधे कारणत्वं कल्प्यते। "एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकम्" इति न्यायेन यथा गोः एकशृङ्गस्य ज्ञानोत्पत्तौ अपरशृङ्गस्य स्मरणं भवति तथैव शब्दज्ञानोत्पत्तौ अर्थस्य स्मरणात् अर्थज्ञानोत्पत्तौ च शब्दस्य स्मरणात् शब्दार्थयोः परस्परं सम्बन्धित्वमङ्गीक्रियते। पुनश्च तस्यैव शब्दश्रवणस्य संस्कारोद्बोधे कारणत्वमपि अङ्गीक्रियते। एवं शब्दानां पदार्थैः साकं यदि सम्बन्धः नाङ्गीक्रियते तर्हि शब्दज्ञानानन्तरम् अर्थानां स्मरणं कदापि न स्यात्। तथैव अर्थानां शब्दैः सह यदि सम्बन्धः नाङ्गीक्रियते तर्हि अर्थज्ञानोत्पत्तौ शब्दानां स्मरणमपि न स्यात्। अतः शब्दैः अर्थानां स्मरणात्, अर्थैश्च शब्दानां स्मरणात् तयोः शब्दार्थयोः परस्परं कश्चित् सम्बन्धः स्वीक्रियते। आचार्येण भर्तृहरिणापि "सति प्रत्ययहेतुत्वं सम्बन्धः उपजायते"[1] इत्यादिना शब्दैः अर्थस्मरणे अन्यस्य कस्यापि प्रत्ययहेतोः अनुपपत्त्या सम्बन्धस्यैव प्रत्ययहेतुत्वमङ्गीक्रियते। तस्यैव सम्बन्धस्य स्वरूपं, नित्यत्वञ्चात्र विचार्यते।

## १. सम्बन्धस्वरूपम्





शब्दार्थयोः परस्परं यः सम्बन्धः अङ्गीक्रियते स सम्बन्धः वृत्तिरूपः भवति। शब्दस्यार्थविवरणमेव वृत्तिः इत्युच्यते। सा च वृत्तिः द्विधा इति नैयायिकाः। शक्तिः लक्षणा चेति। शक्तिः, लक्षणा, व्यञ्जना चेति त्रिधा वृत्तिः इति इतरे। वैयाकरणास्तु पर्यवसाने लक्षणां निराकृत्य वृत्तिद्वयं व्यवस्थापयन्ति। तत्र शक्तेः स्वरूपं किमिति जिज्ञासायामाचार्येण नागेशभट्टेन परमलघुमञ्जूषायां शक्तिस्वरूपमुक्तम् इतरेतराध्यासमूले अभेदे सति तद्बोधहेतुत्वमिति। तथाहि "पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्याया। तद्ग्राहकश्चेतरेतराध्यासमूलकं तादात्म्यम्।"[2] इति। वेदान्तिनां मते यथा एकमेव ब्रह्म विद्यते। ततश्च अविद्यया तस्मिन् ब्रह्मणि जगत् अध्यस्तं भवति। तत्र अध्यारोपेण रज्ज्वां सर्पज्ञानवत् ब्रह्मणि घटादीनां ज्ञानं भवति। परन्तु ज्ञानेन यदा अज्ञानस्य नाशः भवति तदा तु सर्वेषां ब्रह्मत्वेनैव ज्ञानं भवति। अतः पारमार्थिकदृष्ट्या तयोः अभेदत्वमेव अस्तीति विज्ञायते। तथैव वैयाकरणानां मतेऽपि एकमेव शब्दब्रह्म विद्यते। अत्रापि अविद्यया तस्मिन् ब्रह्मणि घटादयः अर्थाः तद्वाचकाः शब्दाश्च अध्यस्ताः भवन्ति। अर्थात् शब्दब्रह्म अज्ञानवशात् घटपटाद्यर्थरूपेण तद्घटपटादिवाचकशब्दरूपेण च विवर्तते इत्यर्थः। अत्रापि पारमार्थिकदृष्ट्या शब्दब्रह्मणः एव सत्त्वात् शब्दार्थयोः अभेद एव विज्ञायते। व्यवहारिकदृष्ट्या यद्यपि शब्दार्थयोः भेदत्वेन प्रतीतिः भवति तथापि तयोः अभेदत्वमारोप्यते। तत्र शब्देन अर्थस्य बोधे कश्चित् सम्बन्धः स्वीक्रियते। स च सम्बन्धः यः शब्दः स अर्थः, यः अर्थः स शब्दः इति इतरेतराध्यासरूपः अभेदः एव। एवं शब्दार्थयोः इतरेतराध्यासरूपे अभेदे सति तत्र शब्दैः अर्थावबोधे हेतुभूता या विद्यते सा एव शक्तिः इत्यर्थः। अत एव आचार्येण व्यासेन पातञ्जलसूत्रभाष्ये उक्तम्

"स्थितोऽस्य वाचकस्य वाच्येन सहाभेदः सम्बन्धः"[3] इति।

तथा शब्दार्थज्ञानानाम् इतरेतराध्यासात् अर्थात् शब्दे अर्थारोपात् अर्थे च शब्दारोपात् सङ्करः स्यादिति आशङ्कायामस्मिन् सूत्रे आचार्येण व्यासेन सङ्केतबुद्धौ स्फोटरूपपदस्य विभागं संकल्प्य सङ्केतस्वरूपव्युत्पादनार्थं "सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मकः सोऽयं शब्दः सोऽर्थः

योऽयमर्थः स शब्दः” इत्यादिना शब्दार्थयोः अभेदरूपः सङ्केतः प्रतिपादितः। तत्रोच्यते न तु व्यवहारिकः अपितु आध्यासिकः यः अभेदः स सङ्केतः इत्यर्थः। स च सङ्केतः स्थितः अर्थात् नित्यः स्मृत्यात्मकश्च इत्युच्यते। तच्च स्मरणं व्याकरणं कोशः आप्तवाक्यमित्यादिभ्यः[४] पाणिन्याद्यनुशासनेभ्यः अर्जितात् ज्ञानात् भवतीति बोध्यम्। एतत्सर्वं मञ्जूषाकारेण आचार्येण नागेशभट्टेन परमलघुमञ्जूषायां व्याख्यातम्। शक्यसम्बन्धरूपा लक्षणा तु “सति तात्पर्ये सर्वे सर्वार्थवाचकाः” इति भाष्यवचनात्, शाब्दबोधं प्रति शक्तिजन्योपस्थितेः लक्षणाजन्योपस्थितेश्च कारणत्वे वक्तव्ये जायमानात् गौरवदोषाच्च खण्ड्यते।

२. ईश्वरेच्छारूपायाः शक्तेः निराकरणम्

नैयायिकैः तु ईश्वरेच्छारूपा शक्तिः स्वीक्रियते। तत्र नव्यनैयायिकाः केवलमिच्छारूपां शक्तिं स्वीकुर्वन्ति। सा च इच्छा द्विधा वर्तते। “अस्माच्छब्दादयमर्थो बोद्धव्यः” इति पदप्रकारकार्थविशेष्यिका, “इदं पदमिममर्थं बोधयतु” इति अर्थप्रकारकपदविशेष्यिका चेति। यथा अस्मात् घटादिपदात् अयं जात्याकृतिविशिष्टव्यक्तिरूपः कम्बुग्रीवादिमान् पदार्थः बोद्धव्यः इति प्रथमा, इदं घटादिपदम् इमं जात्याकृतिविशिष्टव्यक्तिरूपं कम्बुग्रीवादिमन्तं पदार्थं बोधयतु इति द्वितीया। सा इच्छैव सङ्केतः सम्बन्धः इति नैयायिकाभिमतम्। एतन्नैयायिकोक्तं शक्तिलक्षणं परमलघुमञ्जूषाकारेण आचार्येण नागेशभट्टेन नैव अङ्गीक्रियते। तन्मते ईश्वरेच्छायाः शक्तित्वेन ग्रहणमसम्भवम्। कारणं हि इच्छायां सम्बन्धलक्षणस्य समन्वयः नैव सम्भवति। यतो हि सम्बन्धः प्रतियोग्यनुयोगिरूपसम्बन्धिभ्यां भिन्नः, प्रतियोग्यनुयोगिरूपयोः सम्बन्धिनोः उभयत्र विद्यमानः, आश्रयतया विशिष्टबुद्धिनियामकश्च भवति। यथा घटवद् भूतलमित्यत्र घटभूतलयोः यः संयोगरूपः सम्बन्धः सः घटभूतलोभयसम्बन्धिभ्यां भिन्नः, घटभूतलोभयसम्बन्धिस्थले विद्यमानः, घटनिरूपितः यः संयोगः तदाश्रयः भूतलमिति विशिष्टबुद्धेः नियामकश्च भवति। परन्तु प्रकृते घटशब्दः इच्छावान्, घटपदार्थः वा इच्छावान् इति नैव सम्भवति।





कारणं हि इच्छा आत्मनिष्ठः गुणः वर्तते। अतः अचेतने पदे पदार्थे वा इच्छायाः सत्त्वं नैव सम्भवति। एवञ्च सम्बन्धत्वाभावात् ईश्वरेच्छा शक्तिः इति नैव सम्भवति।

३. सम्बन्धस्य नित्यत्वम्

स च अभेदरूपः सम्बन्धः नित्यः एव। कूटस्थः उत्पत्तिविनाशरहितः प्रागभावप्रध्वंसाभावप्रतियोगिरूपः इत्यर्थः। तस्य सम्बन्धस्य नित्यत्वे प्रमाणं तावत्–

“औत्पत्तिकस्तु शब्दार्थयोः सम्बन्धः”[५] इति जैमिनिसूत्रम्,

“इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।

अनादिरर्थैः[६] शब्दानां सम्बन्धो योग्यता तथा॥”[७] इति वाक्यपदीयवचनञ्च।

तत्र जैमिनिसूत्रेण शब्दार्थयोः सम्बन्धः औत्पत्तिकः इत्युच्यते। औत्पत्तिकशब्दस्यार्थः नित्यः एव। वाक्यपदीयकारेण भर्तृहरिणापि उच्यते इन्द्रियाणां चक्षुरिन्द्रियाणां स्वविषयेषु रूपदर्शनादिविषयेषु यथा रूपग्रहणयोग्यता अनादिः, न तु पुरुषकल्पिता तथैव शब्दानाम् अर्थैः सह योग्यतासम्बन्धोऽपि अनादिरूपः, न तु पुरुषकल्पितः इत्यर्थः। चक्षुरिन्द्रिये रूपग्रहणयोग्यता यथा अनादिकालादेव विद्यते तथैव शब्दानां अर्थैः साकं सम्बन्धः अनादिकालादेव अस्तीति सिद्धम्। अतः सम्बन्धस्य नित्यत्वं युक्तमिति प्रतिभाति। वेदान्तिनये यथा उच्यते ब्रह्म जगत् प्रति उपादानकारणमपि भवति निमित्तकारणमपि भवति। तत्र ब्रह्मणि जगत् अध्यस्तं भवतीति कारणात् ब्रह्मणः जगत् प्रति स्वोपाधिप्रधानतया उपादानकारणत्वम्, स्वप्रधानतया निमित्तकारणत्वं चेति विद्यते। तत्र विवर्तितानां घटादीनां तु पारमार्थिकदृष्ट्या ब्रह्माभिन्नत्वमेव वर्तते। तथैव वैयाकरणनयेऽपि एकत्वेन विद्यमानस्य शब्दब्रह्मणः घटपटाद्यर्थरूपेण तत्तदर्थवाचकशब्दरूपेण वा विवर्तितं जगत् प्रति स्वोपाधिप्रधानतया उपादानकारणत्वम्, स्वप्रधानतया च निमित्तकारणत्वमपि विद्यते। अत्रापि विवर्तितानां शब्दानां तदर्थानाञ्च पारमार्थिकदृष्ट्या शब्दब्रह्माभिन्नत्वमेव इति ज्ञेयम्। अतः वाचकशब्दानां ब्रह्माभिन्नतया,

जगतां तन्नाम अर्थानामपि ब्रह्मकार्यत्वात् शब्दाभिन्नतया च अभेदात् तयोः शब्दार्थयोः सम्बन्धस्यापि नित्यत्वं सिध्यति। कार्यकारणयोः शब्दार्थयोः अभेदात्, तयोः शब्दार्थयोः नित्यत्वाच्च सम्बन्धस्यापि नित्यत्वं युक्तमेव प्रतिभाति। अत एव वाक्यपदीयकारेण भर्तृहरिणोच्यते–

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥" इति।

उत्पत्तिविनाशरहितं प्रागभावप्रध्वंसाभावप्रतियोगिरूपं शब्दात्मकं अविनाशि अक्षरात्मकं वा शब्दब्रह्म प्रख्यानम्। ततः ब्रह्मणः एव जगतः क्रियाकलापः प्रचलति। तत् शब्दब्रह्म गोघटाद्यर्थस्वरूपेण विवर्तते इति अस्याः कारिकायाः अर्थः। अत्रोच्यते सर्वेषां गोघटाद्यर्थानां शब्दानुगतत्वेन शब्दः एव सर्वेषां प्रकृतिः भवति। अतः एव शब्दज्ञाने अर्थाः ज्ञायन्ते। यदि अर्थः शाब्दः न स्यात् तर्हि शाब्दे ज्ञाने अर्थस्य प्रतीतिः अपि न स्यात्। यथा चोक्तम् आचार्येण भर्तृहरिणा– "अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" "अर्थप्रवृत्तितत्त्वानां शब्दाः एव निबन्धनम्" "शब्दस्य परिणामोऽयम्" "शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी" "शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत्" इति। एतस्मात् ज्ञायते यत् शब्दब्रह्म प्रकृतिः, गोघटादयः अर्थाः तस्य विकृतयः इति। तेन गोघटादीनामर्थानां शब्दब्रह्माभिन्नतया शब्दार्थयोः नित्यत्वं सिद्धम्। ततः तयोः शब्दार्थयोः नित्यत्वात् तत्सम्बन्धस्यापि नित्यत्वं सिद्धम्।

श्रुत्यापि सर्वेषां पदार्थानां प्रकृतिः शब्दविशेषरूपः ओंकारः इत्युच्यते। अर्थात् शब्दविशेषात्मकस्य वेदस्य जगत्कारणत्वमित्युच्यते। अत एव माण्डूक्योपनिषदि श्रूयते इदं सर्वं जगत् ओङ्कारः एव। ओङ्कारभिन्नं किमपि नास्ति इत्यर्थः। तथाहि श्रुतिप्रमाणम्– "ओंकार एवेदं सर्व्वम्" इति। शारीरकसूत्रे तन्नाम ब्रह्मसूत्रेऽपि "शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" इत्यादौ भाष्यकारेण शङ्कराचार्येण देवादीनामपि शब्दप्रभवत्वमित्युच्यते। देवादयः शब्दात् उत्पन्नाः इत्यर्थः।





तथा तत्रैव भाष्यस्थितया स्मृत्यापि नित्यवाचः सर्वप्रकृतित्वम्, देवादीनां शब्दप्रभवत्वञ्च प्रतिपाद्यते। यथोक्तं महाभारते मनुसंहितायामपि–

"अनादिनिधना विद्या" वागुत्सृष्टा स्वयम्भुवा।

आदौ वेदमयी दिव्या यतः सर्व्वाः प्रवृत्तयः॥" इति

"नामरूपञ्च भूतानां कर्म्मणाञ्च प्रवर्त्तनम्।

वेदशब्देभ्य एवादौ निर्म्ममे स ईश्वरः॥" इति च।

"सर्वेषां तु स नामानि कर्म्माणि च पृथक् पृथक्।

वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्म्ममे॥" इति।

अत्रोच्यते स्वयम्भुवा ब्रह्मणा आदौ उत्पत्तिविनाशरहिता प्रागभावप्रध्वंसाभावप्रतियोगिरूपा नित्या वेदमयी ओङ्काररूपा वाक् उत्सृष्टा। ततः सर्वाः गोघटाद्यर्थाः विवर्तन्ते। सृष्टेरादौ ब्रह्मणा ऋषीणां नामानि, विवर्तितानां पदार्थानां नामानि, प्राणीनां रूपाणि कर्माणि च वेदोक्तशब्देभ्यः एव रच्यन्ते। मनुसंहितायामपि उच्यते सर्वेषां विवर्तितानां पदार्थानां नामानि कर्माणि च पृथक् पृथक् वेदप्रतिपाद्येभ्यः शब्देभ्यः एव उत्पद्यन्ते। एवम्प्रकारेण शब्दविशेषात्मकस्य ओङ्काररूपस्य वेदस्य जगत्कारणत्वं प्रतिपादितम्। तत्र शब्दात् अर्थाः उत्पद्यन्ते इति कारणात् अर्थावबोधे हेतुभूतानां शब्दानाम् उपादानकारणत्वमिति नैव मन्तव्यम्। यतो हि सर्वे शब्दाः तत्तदर्थाश्च ब्रह्मणि एव अध्यस्ताः भवन्ति। अतः कार्यकारणयोः अभेदात् पारमार्थिकदृष्ट्या अर्थहेतुभूतानां शब्दानां ब्रह्माभिन्नत्वात् अर्थानामपि ब्रह्माभिन्नत्वमिति सिद्धम्। एवं शब्दार्थयोः ब्रह्मोपादानत्वमिति बोध्यम्। तथापि नित्यार्थस्य सम्बन्धिनि नित्ये शब्दे सर्वव्यवहारयोग्यम् अर्थनिष्पत्तिहेतुत्वं स्वीकरणीयम्। कार्यकारणयोः नित्यरूपयोः शब्दार्थयोः अभेदात् तत्सम्बन्धस्यापि नित्यत्वम्। कार्यकारणयोरभेदः वाचारम्भणश्रुतौ भगवता

 ISSN 2320-2025

शङ्करेणापि प्रतिपादितः। तत्र हि विकारभूतानां कार्याणां वाङ्मात्रविलसितत्वं, न वास्तविकी सत्तेति स्पष्टम् उक्तम्।

लोके अपूर्वं पदार्थम् उत्पादयन् तद्वाचकं शब्दमेव आदौ अन्तःकरणे स्मरति। ततश्च तमपूर्वं पदार्थं रचयति। एवं शब्दार्थयोः पूर्वापरीभावेन लोकानुसारिणी कार्यकारणव्यवस्था विद्यते। लोके आदौ शब्दः भासते ततश्च अर्थः भासते इत्येतादृशी कार्यकारणव्यवस्था दृश्यते इत्यर्थः। वेदेऽपि आदौ शब्दमुच्चारयन् अर्थं सृजति। यथा "स भूरिति व्याहरत् स भूमिमसृजत"[24] इत्यादिषु स्थलेषु आदौ भूशब्दमुच्चारयति ततः भूलोकं सृजति इति। इत्थं पूर्वापरीभावेन लोकानुसारिणी कार्यकारणव्यवस्था प्रतिपाद्यते। वाक्यपदीये अप्युच्यते शब्दार्थभेदेन एकमेव आत्मनं द्विधा विभज्यते। प्रथमस्तु प्रकाशकः वाचकशब्दः, द्वितीयः प्रकाश्यरूपः शब्देन बोध्यः अर्थः। शब्देन अर्थः प्रकाश्यते इत्यतः शब्दः कारणरूपः भवति। शब्देन यद्यपि बाह्याः घटादयः नैव उत्पद्यन्ते तथापि बौद्धाः घटाद्यर्थाः प्रकाश्यन्ते इत्यर्थाः कार्यरूपाः भवन्तीति बोध्यम्। एवं प्रकाशरूपे कार्ये शब्दार्थयोः प्रकाश्यप्रकाशकरूपा कार्यकारणव्यवस्था वाक्यपदीये प्रदर्शिता। तथा हि कारिका–

"एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ।

प्रकाशकप्रकाश्यत्वं[25] कार्य्यकारणरूपता॥"[26] इति।

इत्थं कार्यकारणयोरभेदत्वनियमेन शब्दार्थयोः कश्चित् कार्यकारणरूपः सम्बन्धः अङ्गीक्रियते। ततश्च तयोः शब्दार्थयोः ब्रह्माभिन्नत्वेन नित्यत्वाच्च तत्सम्बन्धस्यापि नित्यत्वं स्वीक्रियते। तच्च नित्यत्वमाकृतेः अनादित्वेनैव इति बोध्यम्।

पुनश्च तत्रैव वाक्यपदीये अभिजल्पत्वेन कार्यकारणयोः अभेदत्वं प्रतिपाद्यते। तथाहि-

"शब्दो[27] वाप्यभिजल्पत्वमागतो याति वाच्यताम्"[28] इति।



 ISSN 2320-2025

अभिजल्प्यते अनेन इति अभिजल्पः कर्मणि घञ्। वाचकरूपः शब्दः तमभिजल्पत्वं प्राप्य अभिधेयतां याति। अस्य शब्दस्य अयमर्थः, योऽयमर्थः स शब्दः इत्यभिसम्बन्धात् शब्दार्थयोः परस्परं यत् इतरेतराध्यासमूलकम् अभेदरूपसम्बन्धत्वं तदेव अभिजल्पत्वमित्युच्यते। यथा सोऽयमिति अभिसम्बन्धात् शब्दस्य बौद्धार्थेन यदा तादात्म्यं तदा तं शब्दमभिजल्पं कथ्यते। यथा चोक्तं भर्तृहरिणा–

"सोऽयमित्यभिसम्बन्धाद्रूपमेकीकृतं यदा।

शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते॥"[30] इति।

इत्थमभिजल्पत्वस्य स्वरूपप्रतिपादनेन शब्दार्थयोः इतरेतराध्यासरूपः अभेदरूपः सम्बन्धः स्पष्टतया प्रतीयते। तस्य च सम्बन्धस्य नित्यत्वं आकृतेः अनादितया साध्यते।

पुनश्च तत्रैव वाक्यपदीये शब्दः अर्थेन सह एकत्वं प्राप्य प्रवर्तते इति आचार्येण भर्तृहरिणोच्यते। शब्दोच्चारणात् समनन्तरं बौद्धार्थस्य ज्ञानं भवति न तु स्वरूपस्येत्यर्थः। तस्मिन् बोधे शब्दः विशेषणतया वर्तते विशेष्यतया तु अर्थः विद्यते। एवम् अर्थरूपत्वाभावे शब्दप्रवृत्त्यभावः इति व्यतिरेकद्वारेण अर्थे शब्दविशेषणत्वं प्रतिपाद्यते। तत्प्रतिपादिका कारिका यथा–

"लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते"[31] इति।

एतेनापि शब्दार्थयोः कार्यकारणरूपः सम्बन्धः स्पष्टतया प्रतीयते। ततः कार्यकारणयोरभेदत्वनियमात् शब्दार्थयोरपि अभेदत्वमिति ज्ञातम्। ततश्च तयोः शब्दार्थयोः ब्रह्माभिन्नत्वेन नित्यत्वाच्च तत्सम्बन्धस्यापि नित्यत्वमिति सिद्धम्। शारीरकभाष्ये भाष्यकारैः शङ्कराचार्यैः अपि प्रतिपादितं यत् शब्दार्थयोः विद्यमानः सम्बन्धः नित्यः इति। तथाहि शब्दानां शक्तिः कुत्र व्यक्तिषु जातिषु वा? व्यक्तिषु चेत् तस्याः आदिमत्त्वे अर्थानामपि आदिमत्त्वं सिध्यति। जातिषु चेत् तस्याः अनादितया अर्थानामपि अनादित्वं सिध्यति। यथा घटशब्दस्य घटव्यक्तौ सम्बन्धस्वीकारात्

 ISSN 2320-2025

तस्याः घटव्यक्तेः आदिमत्त्वे घटार्थस्यानित्यत्वं सिध्यति। परन्तु घटजातिषु सम्बन्धस्वीकारात् तस्याः घटाकृतेः अनादितया घटार्थस्य नित्यत्वं सिध्यतीति जातिशक्तिवादः स्वीक्रियते भाट्टमीमांसकैः। साहित्यदर्पणकारेण आचार्येण विश्वनाथेनापि "संकेतो गृह्यते जातौ"[११] इत्यादिना संकेतः जातौ गृह्यते इत्युक्तम्। अद्वैतवेदान्तिनः तु व्यवहारे भाट्टमतान् अङ्गीकुर्वन्ति। तत्रोच्यते शब्दोच्चारणात् अर्थप्रतीतौ अर्थानामादिमत्त्वेऽपि तदर्थाकृतीनाम् अनादितया अर्थानां नित्यत्वं सिध्यति। ततश्च तत्रैव नित्यरूपायामाकृत्यां सम्बन्धस्वीकारात् तत्सम्बन्धस्यापि नित्यत्वं सिध्यति। पुनश्च देवदत्तादीनाम् आधुनिकशब्दानामाकृतौ सम्बन्धस्वीकारेण तत्तदाकृतेः अनादितया यत् विरोधादिकं सम्भवति तदपि परिहृतं भाष्यकारेण शङ्कराचार्येण[१२]। आकृतिस्तु जातिः उपाधिः वा। तत्र नित्यत्वे सति अनेकानुगतत्वं जातित्वम्, जातिभिन्नधर्मत्वम् उपाधित्वमिति बोध्यम्। यथा गोत्वं जातिः आकाशत्वञ्च उपाधिः। सा च जातिरूपा उपाधिरूपा वा आकृतिः ब्रह्मसत्तायाः सम्बन्धविशेषः इत्याकरे स्फुटम्। अत एव भर्तृहरिणा उच्यते–

"व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्।

नित्य एव तु सम्बन्धो[१३] डित्थादिषु गवादिवत्॥"[१४] इति।

यद्यपि डित्थादीनां शब्दानां भूतभविष्यत्वर्तमानकाले डित्थादिषु व्यक्तिषु शक्तिः वर्तते तथापि तेषां डित्थादीनां संज्ञाशब्दानां पिण्डविशेषे पित्रादिना व्यवहाराय नियमः क्रियते। यथा पुत्रे जाते तस्मिन् पिण्डविशेषे पित्रादिना व्यवहारार्थं देवदत्तः इति नामकरणं क्रियते। गवादिशब्दानां गवादिषु व्यक्तिषु यथा सम्बन्धः तथैव डित्थादीनां संज्ञाशब्दानां डित्थादिषु व्यक्तिषु योग्यतारूपः सम्बन्धः। प्रवाहनित्यतया अर्थात् आकृतिनित्यत्वाभिप्रायेण तस्य सम्बन्धस्यापि अकृत्रिमत्वं तन्नाम नित्यत्वमिति बोध्यम्।

## ४. उपसंहारः



 ISSN 2320-2025

शब्दैः अर्थस्मरणे, अर्थैश्च शब्दस्मरणे अन्यस्य कस्यापि हेतोः अनुपपत्त्या सम्बन्धस्यैव हेतुत्वमङ्गीकृतम्। ततः वृत्तिरूपस्य सम्बन्धस्वरूपस्य व्याख्यानावसरे "पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्याया" इत्यादिना शक्तिरूपं सम्बन्धं प्रतिपाद्य पारमार्थिकदृष्ट्या शब्दार्थयोः अभेदत्वं प्रतिपादितम्। व्यवहारिकदृष्ट्या शब्दार्थयोः भेदत्वेन प्रतीतौ अपि तयोः अभेदत्वमारोपितम्। ततश्च यः शब्दः स अर्थः, यः अर्थः स शब्दः इत्येवम्प्रकारेण इतरेतराध्यासरूपः अभेदरूपः सम्बन्धः प्रतिपादितः। तदनन्तरं नैयायिकोक्तायाः ईश्वरेच्छारूपायाः शक्तेः शाब्दिकनयेन निराकरणं प्रदर्श्य अभेदरूपस्य सम्बन्धस्य नित्यत्वम्, कूटस्थत्वम्, उत्पत्तिविनाशरहितत्वम्, प्रागभावप्रध्वंसाभावाप्रतियोगिरूपत्वं वा जैमिनिनयेन, भर्तृहरिनयेन, श्रुत्यनुसारेण, महाभारतदृष्ट्या, मनुसंहितानुसारेण, लौकिकप्रमाणेन, शारीरकभाष्यानुसारेण, साहित्यदर्पणानुसारेण च प्रतिपादितम्। ततश्च डित्थादीनां संज्ञाशब्दानां डित्थादिषु व्यक्तिषु विद्यमानस्य योग्यतारूपसम्बन्धस्यापि प्रवाहनित्यतया नित्यत्वं प्रतिपादितमिति शम्।

********

---

[१] वाक्यपदीये पदकाण्डे सम्बन्धसमुद्देशे कारिकासंख्या - ३७

[२] परमलघुमञ्जूषायां शक्तिनिरूपणप्रकरणम्। पृष्ठ - ११

[३] पातञ्जलयोगदर्शने समाधिपादे योगसूत्रम् - २७

[४] शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ इति।

[५] मीमांसासूत्रम् – १.१.५

[६] प्रतीतिरर्थे इति पाठः उनाशङ्करशर्मणा सम्पादिते शब्दार्थतत्त्वे प्राप्यते।

[७] वाक्यपदीये पदकाण्डे सम्बन्धसमुद्देशे कारिकासंख्या – २९

[८] काव्यप्रकाशे ... मुद्रिते शब्दार्थतत्त्वे तु प्राप्यते इति पाठः दृश्यते।

[९] वाक्यपदीये ब्रह्मकाण्डे कारिकासंख्या - १

[१०] वाक्यपदीये ब्रह्मकाण्डे कारिकासंख्या - १२३

[११] तत्रैव कारिकासंख्या - १२

[१२] तत्रैव कारिकासंख्या - १०७

[१३] तत्रैव कारिकासंख्या - ११८

तत्रैव कारिकासंख्या - २९

छान्दोग्योपनिषदि शाङ्करभाष्य - २/२३/१

ब्रह्मसूत्रम् – १.३.२८

क्रिया इति पाठः काव्यप्रकाशग्रन्थात् मुद्रिते शब्दार्थरत्ने, उमाशङ्करशर्मणा सम्पादिते शब्दार्थरत्ने च प्राप्यते।

“जातौ यदन्नी क्रिया यतः तथा प्रयुज्यते” इति पाठः महाभारतस्य शान्तिपर्वणि नव नास्ति।

नष्टेश्वर इति पाठः काव्यप्रकाशग्रन्थात् मुद्रिते शब्दार्थरत्ने, उमाशङ्करशर्मणा सम्पादिते शब्दार्थरत्ने च दृश्यते।

महाभारते शान्तिपर्वणि त्रिचत्वारिंशदुत्तरद्विशततमे अध्याये श्लोकसंख्या २४-२९

उमाशङ्करशर्मणा सम्पादिते शब्दार्थरत्ने तु “एषामेव” इति पाठः विद्यते।

मनुस्मृतिः – १.२१

छान्दोग्योपनिषदि शाङ्करभाष्य – ६.१.४

तैत्तिरीयब्राह्मणम् – २.२.४.२

“प्रकाशकः प्रकाश्यश्च” इति पाठः काव्यप्रकाशग्रन्थात् मुद्रिते शब्दार्थरत्ने दृश्यते। उमाशङ्करशर्मणा सम्पादिते शब्दार्थरत्ने तु “प्रकाशकः प्रकाश्यश्च” इति।

वाक्यपदीये वाक्यकाण्डे कारिकासंख्या २१-२६

“शब्दोऽप्यर्थाभिजल्पत्वम्” इति पाठः काव्यप्रकाशग्रन्थात् मुद्रिते शब्दार्थरत्ने प्राप्यते। नच समीचीनमिति प्रतिभाति।

वाक्यपदीये वाक्यकाण्डे कारिकासंख्या – १२७

वाक्यपदीये वाक्यकाण्डे कारिकासंख्या –१२८

वाक्यपदीये वाक्यकाण्डे कारिकासंख्या – १३०

साहित्यदर्पणस्य द्वितीये परिच्छेदे शक्तिनिरूपणप्रसङ्गः द्रष्टव्यः।

ब्रह्मसूत्रस्य शाङ्करभाष्यम् – १.३.२८

शक्तिर्मे प्रतिसञ्ज्ञा इति पाठः काव्यप्रकाशग्रन्थात् मुद्रिते शब्दार्थरत्ने, उमाशङ्करशर्मणा सम्पादिते शब्दार्थरत्ने च दृश्यते।

वाक्यपदीये वाक्यकाण्डे कारिकासंख्या – २२४

## परिशीलितग्रन्थसूची


१) जैमिनिः। *मीमांसादर्शनम्*। आपटे, विनायकगणेशः (सम्पादकः)। आनन्दाश्रमः : आनन्दाश्रममुद्रणालयः, १९२९।

२) तर्कवाचस्पतिः, तारानाथः। *शब्दार्थरत्नम्*। कलिकाता : काव्यप्रकाशयन्त्र, १८७२।

३) तर्कवाचस्पतिः, तारानाथः। *शब्दार्थरत्नम्*। शर्मा, उमाशङ्करः (सम्पा.)। वाराणसी : चौखम्बा भारती अकादमी, २०१५।







४) पतञ्जलिः। *व्याकरणमहाभाष्यम् (प्रदीपोद्योततत्त्वालोकटीकाभिः समलंकृतम्)*। शर्मा, रुद्रधरः झा (सम्पा.)। वाराणसी : चौखम्भा संस्कृत संस्थान, २००४।

५) पतञ्जलिः। *व्याकरणमहाभाष्यम् (सप्रदीपेन भावबोधिन्या च समलंकृतम्)*। त्रिपाठी, जयशंकरलालः (सम्पा.)। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०१३।

६) पाणिनिः। *अष्टाध्यायी*। पाण्डेयः, श्रीगोपालदत्तः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २००५।

७) पाणिनिः। *अष्टाध्यायीसूत्रपाठः*। दीक्षितपुष्पा (सम्पा.)। नवदेहली : संस्कृतभारती, २०१०।

८) भट्टः, कुल्लूकः। *मनुस्मृतिः (मन्वर्थमुक्तावलीटीकोपेता मणिप्रभाहिन्दीव्याख्योपेता च)*। शास्त्री, हरगोविन्दः (सम्पादकः)। वाराणसी : चौखम्भा संस्कृत भवन, २०१५।

९) भट्टः, कौण्डः। *वैयाकरणभूषणसारः (दर्पण-सुबोधिनीव्याख्याद्वयोपेतः)*। द्विवेदी, चन्द्रिकाप्रसादः (सम्पा.)। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१६।

१०) भट्टः,कौण्डः। *वैयाकरणभूषणसारः (प्रभादर्पणव्याख्याद्वयोपेतः)*। पद्मोली, श्रीबालकृष्णः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान, २००६।

११) भट्टः, नागेशः। *परमलघुमञ्जूषा (भावप्रकाशिका-बालबोधिनीव्याख्याद्वयोपेता)*। त्रिपाठी, जयशंकरलालः (सम्पादकः)। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०११।

१२) भट्टाचार्यः, श्रीविश्वनाथपञ्चाननः। *न्यायसिद्धान्तमुक्तावली (बालप्रियाटीका-आलोकटीकाद्वयोपेता)*। मुसलगाँवकरः, डॉ. गजाननशास्त्री; दाहालः, आचार्यः लोकमणिः च (व्याख्याकारौ)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११।

१३) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीव्याख्योपेता)*। पद्मोलिः, श्रीबालकृष्णशर्मा (सम्पा.)। वाराणसी : मोतिलाल बनारसी दास, १९६६।

१४) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (बालमनोरमया तत्त्वबोधिन्या च टीकाभ्यां भूषिता)*। शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः (सम्पा.)। वाराणसी : मोतीलाल बनारसीदास, २०१०।

१५) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* गोविन्दाचार्यः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१२।

१६) भर्तृहरिः। *वाक्यपदीयम् (प्रतिभाव्याख्योपेतम्)*। खण्डूडी, सत्यनारायणः (सम्पा.)। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०१४।

१७) भर्तृहरिः। *वाक्यपदीयम् (नवीनचन्द्रप्रकाश-नारायणीहिन्दीव्याख्योपेतम्)*। तिवारी, हरिनारायण (सम्पा.)। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, २०१५।

१८) विश्वनाथकविराजः। *साहित्यदर्पणः (लक्ष्मीव्याख्यासहितः)*। शास्त्री, कृष्णमोहनः (सम्पादकः)। वाराणसी : चौखम्बा संस्कृत संस्थान, २०१५।


**परिचयः**


Sudip Mandal

Assistant Professor & Head,

Department of Sanskrit,

University of North Bengal

Phone No – 8240181987/7890766880

Email – sudiprkmvu@gmail.com






# शिशुपालवधे दार्शनिकतत्त्वानां विवेचनम्

प्रो॰ कुलदीप कुमार

संस्कृतकाव्यमंदाकिनी अस्माकं सर्वेषां सहृदयानां हृदयानि पवित्रीकरोति। सौन्दर्यमयी माधुर्यगुणोपेता एषा सर्वेषां संस्कृतानुरागिणां मनसि हर्षमुत्पादयन्ति। भारतीयवाङ्मये बहुभिः कविभिः मनीषिभिः निजकाव्यरचनां कृत्वा अस्या अजस्रप्रवाहे योगदानं कृतम्। अस्माकं भारतभूमौ कालिदास–माघ–भारवि–दण्डिप्रभृतयः महाकवयः समये समये समुद्भूताः। तेषु महाकविषु 'शिशुपालवधम्' नामकस्य महाकाव्यस्य रचयिता विराजन्ते माघमहाकवयः। संस्कृतसाहित्यगगने महाकविमाघस्य अतीव महत्त्वपूर्णं स्थानं वर्तते। कवेः माघस्य गौरवाधायकं ग्रन्थरत्नं शिशुपालवधनामकमेकमेव समुपलभ्यते। महाकाव्ये अस्मिन् विंशतिः सर्गाः, पञ्चचत्वारिंशदुत्तरषट्शताधिक एकसहस्रं श्लोकाश्च विद्यन्ते। कालिदासस्य कृतिषु उपमानां प्राधान्यं वर्तते। भारवेः किरातार्जुनीये अर्थगौरवस्य वैशिष्ट्यमस्ति। दण्डिनः दशकुमारचरिते पदलालित्यं प्रतिभाति तत् सर्वं माघस्य शिशुपालवधे वर्तते। अत एव सानन्दमुद्घोष्यते यत्

**उपमा कालिदासस्य, भारवेरर्थगौरवम्।**

**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

ग्रन्थेऽस्मिन् साहित्यिकतत्त्वैः सह दार्शनिकतत्त्वानां प्राचुर्यमप्यवलोक्यते। सर्वप्रथमं वयमत्र 'दर्शनम्' इत्यस्य शब्दस्य अर्थमवगन्तुं प्रयत्नं कुर्मः। तदनन्तरं शिशुपालवधे वर्णितानां दार्शनिकतत्त्वानां चर्चां कुर्मः।

प्रेक्षणार्थकाद् दृश् धातोः (दृशिर् प्रेक्षणे) ल्युट्-प्रत्यये कृते दर्शनशब्दो निष्पद्यते। संस्कृतभाषायाम् अयं शब्दः दर्शनं नपुंसकलिङ्गे विराजते। सर्वप्रथमं प्रश्नोऽयं समुद्भवति यत् किं नाम दर्शनम्? अस्य व्युत्पत्तिलभ्यार्थोऽस्ति– '**दृश्यते अनेन इति दर्शनम्।**' '**दृश्यतेऽनेन परम तत्त्वमिति दर्शनम्।**' दर्शनं सामान्यावबोधलक्षणम्। अस्य शब्दस्य व्युत्पत्तिदृष्ट्या अर्थदृष्ट्या च स्पष्टरूपेण कथयितुं शक्यते यत् येन माध्यमेन साधनेन वा इदं विश्वं, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, परमात्मा, अन्तरात्मा, प्रकृतिश्च याथातथ्येन दृश्यन्ते, निरीक्ष्यन्ते, समीक्ष्यन्ते विविच्यन्ते च तद् दर्शनम्। अतः वयमत्र

स्पष्टतया वक्तुं शक्नुमः यत् आध्यात्मिकम्, आधिदैविकम्, आधिभौतिकञ्च प्ररूपणं विवेचनं वा दर्शनशब्दान्तर्गतं विराजते।

किं ब्रह्म? तस्य किं स्वरूपं? क ईश्वरः? को जीवः? क अजीवः? किं मूलतत्त्वम्? के तस्य प्राप्तेरुपायाः? अस्मिन् जगति किं शाश्वततत्वम्? इयं सृष्टिः कुतः समागता? किं पुनर्जन्म? किं शरीरम्? जीवस्य उद्भूतिः कुतः सञ्जाता? किं तस्य लक्षणम्? कथं मोक्षस्य प्राप्तिर्भवति? आत्मा चेतनोऽचेतनो वा? अस्याः सृष्टेः कः कर्ताः? किं जीवनस्य कर्तव्यम् अकर्तव्यं वा? इत्यादिनां प्रश्नानां समाधानं यत्र सुसूक्ष्मदृष्ट्या विविच्यन्ते तद् दर्शनम्। सुसूक्ष्मदृष्ट्या इदमपि वक्तुम् शक्यते यत् तत्त्वार्थदर्शनमेव दर्शनम्। यथोच्यते केनोपनिषदि-

> **''केनेषितं पतितं प्रेषितं मनः, केन प्राणः प्रथमः प्रैति युक्तं।**
>
> **केनेषिता वाचमिमां वदन्ति, चक्षुः क्षोत्रं क उ देवो युनक्ति।।''[1]**

भारते प्रचलितदर्शनानां वर्गीकरणं सर्वप्रथमं वयम्, अस्माकं देशे द्विधा विभक्तं कर्तुं शक्नमः भारतीयदर्शनानि अभारतीयदर्शनानि च। येषां दर्शनानां प्रादुर्भावः भारतादिपूर्वीदेशेषु अभवन् ते सन्ति भारतीयदर्शनानि। भारतीयदर्शनानाम् अपरनाम पूर्वीदर्शनमपि अस्ति। येषां दर्शनानां प्रादुर्भावः यूरोपादिपाश्चात्यदेशेषु अभवन् ते सन्ति अभारतीयदर्शनानि। अभारतीयदर्शनानाम् अपरनाम पाश्चात्यदर्शनमपि अस्ति।

भारतीयदर्शनानि मुख्यरूपेण द्विधा विभज्यन्ते- वैदिकदर्शनानि, अवैदिकदर्शनानि च। यानि दर्शनानि वेदानां प्रामाण्यम् अङ्गिकुर्वन्ति तानि वैदिकदर्शनानि इति कथ्यन्ते। यानि दर्शनानि वेदानां प्रामाण्यं नाङ्गिकुर्वन्ति तानि अवैदिकदर्शनानि इति कथ्यन्ते। तत्र साङ्ख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्तादिनि षड्दर्शनानि वैदिकदर्शनानि सन्ति। चार्वाक-बौद्ध-जैनदर्शनानि अवैदिकदर्शनानि सन्ति।

केचन जना अनेनैव कारणेन अवैदिकदर्शनानि नास्तिकदर्शनान्यपि प्रतिपादयन्ति यत् समीचीनं नास्ति। यतोहि जैनबौद्धयोरपि वेदानां प्रामाण्यं रूपान्तरेण व्यवहारबुद्ध्या वा स्वीक्रियते एव। तथा पाणिनिव्याकरणदृष्ट्यापि यान्यप्यास्तिकस्य लक्षणानि सन्ति। तानि सर्वाणि उभयोः दर्शनयोः विराजते नास्ति अत्र कापि शङ्कायाः स्थानम्।

[1] केनोपनिषदम्, १.१





शिशुपालवधे वैदिकावैदिकयोः द्वयोः दर्शनयोः यत्र तत्र विवेचनमुपलभ्यते। महाकविना माघेन शिशुपालवधमहाकाव्ये परमात्मा श्रीकृष्णः ईश्वररूपेण उपस्थापितो दृश्यते। अनेन इदं ज्ञातुं शक्यते यत् परमात्मनः श्रीकृष्णस्य अलौकिकं किञ्चित् वैशिष्ट्यम् औपनिषदं वेदान्तदर्शनेन अभिप्रेरितमवबुध्यते। तत्र वेदान्तादिदर्शनेषु परमात्मनः परब्रह्मणः परिकल्पना तावत् सर्वेषां जगतां सर्वोच्चसत्तारूपेण उपकल्पितः दृश्यते। परब्रह्म तावत् सर्वव्यापि इति वयं सर्वे जानीमः तादृशः सर्वव्यापिनः ब्रह्मणः प्रकाशेनैव सर्वेषां प्राणिनां प्रकाशः भवति इत्यादि सर्वैः ज्ञायते एव। अत्र महाकविमाघः शिशुपालवधमहाकाव्ये चतुर्दशसर्गे भगवन्तं श्रीकृष्णमेव वर्णयति यत्-

> ''मर्त्यमात्रवदीधरद्भवान् मैनमानमितदैत्यदानवम्।
>
> अंश एष जनतातिवर्तिनो वेधसः प्रतिजनं कृतस्थितेः।।''[2]

अनेन इदमवगन्तव्यं यत् माघः श्रीकृष्णं न केवलं मानवं मनुते, अपितु साक्षात् परब्रह्मस्वरूपं परमात्मानमेव मनुते। एवं दर्शनशास्त्रप्रतिपाद्यं ब्रह्मसम्बन्धिविचारं माघः तत्र तत्र यथावसरं प्रतिपादयति। बहुविचिन्तयता माघेन ब्रह्मविषयिणि चर्चा करणसमये कथितं यत् ब्रह्म तावत् त्रिकालदर्शि त्रिलोकव्यापि च चकास्ति। तादृशस्य परब्रह्मणः मधुसूदनस्य ईश्वरस्य उदरे एव भुवनत्रयं स्थितरता तिष्ठति तादृशीसर्वव्यापी सत्तायाः स्वरूपनिरूपणावसरे कविः उल्लिखति यत् भगवतः श्रीकृष्णस्य कुक्षौ चत्वारः समुद्राः समाविष्टाः। यस्य शरीरसन्निधषु समस्ताः सरिताः विलिनाः तस्य केशेभ्यो मेघावलयः विनिंगता इति विंशतितमे सर्गे वर्णितं यत्-

> **''चतुरम्बुधिगर्भधीरकुक्षेर्वपुषः सन्धिषु लीनसर्वसिन्धोः।**
>
> **उदगुः सलिलात्मनस्त्रिधाम्नो जलवाहावलयः शिरोरुहभ्यः।।''[3]**

न केवलं एतावान् विशेषः शिशुपालवधस्य काव्यस्य अपितु भीष्मपितामहः श्रीकृष्णस्य परमात्मस्वरूपमेवं मानदेहसम्बन्धञ्च स्मरणं प्रकाशयति यथा-

[2] शिशुपालवधम्, १४, ५९

[3] शिशुपालवधम्, २०, ६६

**''सर्ववेदिनमनादिमास्थितं देहिनामनुजिघृक्षया वपुः।**

**क्लेशकर्मफलभोगवर्जितं पुंविशेषममीश्वरं विदुः।।''[4]**

एवं महाकविना माघेन कृतमिदं दार्शनिकविवचनं मूलतः **'क्लेशकर्मविपाकाशयै-रपरामृष्टः पुरुषविशेष ईश्वरः'** इति पातञ्जलयोगसूत्रवचनेन सादृश्यं भजते एवं कविना उपनिषद्प्रतिपाद्यस्य ब्रह्मणज्ञानस्य सम्पूर्णपरिचयः प्रदर्शितः अर्थात् कृष्णब्रह्मणो अभेद एव प्रदर्शितः। यथा श्रीकृष्णः सत्याचरणशीलोऽपि मायावान् वृद्धोऽपि बालकः, जनितोऽपि अजः। अत एव उक्तम्–

**'अजायमानो बहुधविजायते'** इति। एवं नवोऽपि पुराणपुरुषः एतत् सर्वं मनसि निधाय रचयति कविमाघः–

**''सत्यवृत्तमपि मायिनं जगद्वृध्दमप्युचितनिद्रमर्थकम्।**

**जन्म बिभ्रतमजं नवं बुधा यं पुराणपुरुषं प्रचक्षते।।''[5]**

यथा वा वेदान्तदर्शनस्य बहूनिः तत्त्वानि माघकाव्ये दृश्यन्ते तथैव सांख्यदर्शनस्य अपि अनेकानि तत्त्वानि स्पष्टतया उपलभ्यन्ते, यथा नारदः श्रीकृष्णस्य स्तुतिं यदा करोति तद् सांख्योक्तपुरुषलक्षणस्य तादात्म्यं भजते। यथा–

**''उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कचञ्चन।**

**बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः।।''[6]**

एवं तथा वा सांख्यदर्शने आत्मा पुण्यपापादिकर्मानुष्ठानं स्वयं न करोति परन्तु बुद्धिरेव पुरुषं कारयति तत्र आत्मना एव कर्तृत्वं तेषां कर्मणामिति मन्येत तदेव कविनापि माघकाव्ये एवं प्रदर्शितः–

[4] शिशुपालवधम्, १४, ६२
[5] शिशुपालवधम्, १४, ७०
[6] शिशुपालवधम्, ०१, ३३





''विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्।

फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि।।''[7]

अन्यत्र भगवतः श्रीकृष्णस्य वर्णनप्रङ्गे आत्मना साक्षित्वं फलभागित्वञ्च सम्यक् प्रदर्शितमस्ति। एवं धर्मपुत्रस्य युधिष्ठिरस्य यागप्रसङ्गेऽपि तस्य सांख्यपुरुषतुल्यता वर्णिता यथा

''तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयमकुर्वतः क्रिया।

कर्तृता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथर्त्विजि।।''[8]

एवं यथा सांख्यदर्शनप्रतिपादिततत्त्वानां विवेचनं माघकाव्ये उपलभ्यते तद्वत् योगदर्शनसम्बद्धं विवेचनमपि समुपलभ्यते। यथा–

**''मैत्र्यादिचित्तपरिकर्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य वाञ्छन्ति तामपि समाधिभृतो न रोद्धुम्।।''[9]** पश्यन्तु, अत्र श्लोके समाधिशब्देन योगदर्शनप्रतिपादितानि–

यमनियमासनप्रायाणामप्रत्याहारध्यानधारणासमाधिरूपाणि अष्टौ अङ्गानि ग्राह्यानि। अनेन ज्ञायते यत् माघकवेः योगविषयकं परिज्ञानं सम्यकवगन्तुम् शक्यते। किञ्च–

''उपैतुकामैस्तत्पारं निश्चतैर्योगिभिः परैः।

देहत्यागकृतोद्योगैरदृश्यत परः पुमान्।।''[10]

इत्यनेन पद्येन अस्माभिः स्पष्टवगन्तुं शक्यते यत् माघकवि अष्टसिद्धिवर्णनं, चित्तवृत्तिवर्णनं, यमनियमवर्णनं, ध्यानयोगादिवर्णनञ्च उपस्थापयति।

एवं शिशुपालवधमहाकाव्ये कविना माघेन न्यायदर्शनशास्त्रीयप्रयोगार अपि सुष्टु प्रतिपादिताः यत् सविकल्प निर्विकल्पकज्ञानम्, अनुमानप्रमाणं, निमित्तकारणम्, उपादानकारणमित्यादि विचारा अपि उपलभ्यन्ते। यथा व्यापक आकाशः स्वयं

[7] शिशुपालवधम्, ०२, ५९
[8] शिशुपालवधम्, १४, १९
[9] शिशुपालवधम्, ४, ५५
[10] शिशुपालवधम्, १९, ८७

क्रियाशून्यः सन् अपि परेण उत्पादितं शब्दम् आत्मीयं गुणमेवाङ्गीकरोति तथैव राजा निष्क्रिय सन् परसम्पन्नं कार्यं स्वगुणमिव आदधाति। यथा–

"अप्यनारभमाणस्य विभोरुत्पादिताः परैः।

व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः॥"[11]

एवं न केवलं शिशुपालवधमहाकाव्ये वैदिकदर्शनानां विचारविमर्शः दृश्यते अपितु अवैदिकदर्शनानामपि विचारविमर्शः दृश्यते। यथा–

"सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्।

सौगातानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्॥"[12]

यथा वा बौद्धानां नये पञ्चस्कन्धातिरिक्तस्य आत्मनः पृथक्तया अस्तितत्त्वं नास्ति तथैव राज्ञां पञ्चाङ्गयुक्तमन्त्रातिरिक्तः मन्त्रः नास्त्यैव। एवमेव यथा जैनदर्शने सुप्रसिद्धः प्रमुखश्च विचारः स्याद्वादविचारः तत्र–तत्र काव्येषु महाकविना माघेन श्रीकृष्णवर्णनप्रसङ्गे शिशुपालवधप्रसङ्गे वा सुष्टुतया वर्णिता।

सम्पूर्णशिशुपालवधमहाकाव्यस्य अवलोकनवेलायाम् अत्यन्तसुलभतया इदं ज्ञातुं शक्यते यत् अयं महाकविः न केवलं कविसार्वभौम अपितु दार्शनिकसिद्धान्तमर्मवेत्ता इत्यपि वक्तुं शक्यते। अत एव साहित्यमपि शास्त्राभिधां भजते।

आचार्यः (जैनदर्शनविभागः)

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

नवदेहली–110016

दूरभाषम्– 9560250117

[11] शिशुपालवधम्, ०२, ९१

[12] शिशुपालवधम्, ०२, २८





# SHRI AUROBINDO AND AN IDEA OF DIVINITY

Dr. Chirashree Mukherjee
Assistant Professor
Department of Sanskrit
Ramananda College, Bishnupur, Bankura

**Abstract:**

It is said that Rishi Aurobindo was close to being divine because of the life he chose to live. The man gave structure to his divine life and outlined the ways and means to it, saying that life was the nodus for human beings when they were transcendent and universal, yet were able to retain their individual self. In transcendence, Shri Aurobindo was able to rise above the range of normal human experience, attaining a higher level of awareness and knowledge. His approach would alter from time to time as he sought purity and meaning in his decisions. It led to divinity as he became integral and universal and attained a higher consciousness, seeking to know himself, to know the race of men. Shri Aurobindo's approach would guide others as the Rishi acknowledged this as momentous discovery for humanity in his time and for generations to come in the future. Accordingly, his philosophy also served as a basis and guide for education. This essay details his life journey towards and during the realisation.

**Keywords:** Rishi Aurbindo, divine, philosophy, imperial, Pondicherry, ashram.

## Introduction:

Born Aurobindo Ghose on 15 August in the year1872, little did the newborn know that his birth date coincided with a date to be marked forever in the national calendar many years later during Indian independence.

Sri Aurobindo Ghose was born in Calcutta on August 15, 1872, into a Brahmo family.His father was a senior medical officer. At age five, he along with his two brothers were sent to Darjeeling's Loreto Convent School and later to an English education in England to fit with the aspirations of such families of the time.

Along with English, he studied Latin, French, Greek and English poetry. At the right age he would join King's College, Cambridge, following his father's wishes and cleared the written portion of the Indian Civil Service (ICS).

As a child he had been directed along with his brothers towards anglicised education with the intention of a career in the ICS. Aurobindo Ghose found a way out. He allowed himself to arrive late for the equestrian examination, thereby opting out of the race to become an ICS officer.

The philosopher, yoga guru, maharishi and poet would go on to be known as an Indian nationalist from Bengal in his younger days. Aurobindo Ghose would however change his life course more than once, especially when his higher level of thought earned him plaudits as Rishi Aurobindo in Pondicherry, at a distance from both the imperial colony of Bengal and his earlier interests in the land of his birth.

**Problem solution/main story:**

At first Aurobindo Ghose returned to India to work with the Baroda State Service. His return was not unmarked by tragedy, for his father had passed away when he received the erroneous information the the ship that his son Aurobindo was on, had sunk off the coast of Portugal. Nonetheless, upon his arrival on the west coast of India and in Baroda State, Aurobindo put his abilities to work. Aurobindo had acquired the benefit of knowledge of a dozen classical and modern languages absorbed through schooling in England and study at Kings's College in Cambridge. His knowledge of languages would serve him well throughout the rest of his life when he put it to use back in India. He took up civil work under the Maharaja of the Princely state of Baroda, often teaching, as required. It included English and French, both of which were well within his grasp and teaching capability. He studied Sanskrit and Bengali of his own volition and wrote prose and poetry. He also took up the mantle of Vice Principal of Baroda College. But the young man would move on. He travelled across the country, meeting nationalists and luminaries of the time.

There were many national influences of the milieu of the time. He could see that liberation from the British masters had become more than necessary. Aurobindo became a family man at the start of the twentieth century, seeking a Hindu wife on his own and marrying Mrinalini Devi' He settled down for the time being. His young wife too came from an enlightened background and had been schooled accordingly.

The man realised that his role would be in the fight for independence. By 1906 Aurobindo Ghose was the chief editor at Bande Mataram', a nationalist publication. Till 1910 he remained one of the leaders of the movement. Aurobindo Ghose was drawn to the causes inherent in





India. He had had an awakening. Back in Calcutta he had found the answer to his restricted education and upbringing in England since childhood.

The charge of treason, however, lay in articles he had penned In 1907, at the suggestion of his younger brother Barin. Aurobindo, Barin and others like them hadinitiated a Bengali paper. 'Yugantar'. Here Aurobindoadvocated open revolt and absolute denial of British rule in his journalism.He was jailed.

Aurobindo came out clean in a court case regarding murder of a prosecution witness due to lack of evidence.Once out of the prison he started two new publications, 'Karmayogin' in English and 'Dharma' in Bengali from a single office room in Calcutta. His expressive abilities in the English newspaper Karmayogin in an article titled 'To My Countrymen', was noted as being seditious by the British rulers.

A speech delivered at Uttarpara mentioned interest in spiritual matters as he sought a way out of the repression he was facing. He was aware that his true roots were as an enlightened citizen of his country. He moved out of imperialist Bengal to a French colony. He had sought freedom away from all that he left behind. Mrinalini Devi was not informed about his decision to move out. He had been engrossed in his newspaper even after release from jail.

Later he would say about his time in jail: "I have spoken of a year's imprisonment. It would have been more appropriate to speak of a year's living in a forest, in an ashram, hermitage...the only result of the wrath of the British government was that I found God." His initial years in Pondicherry were mainly devoted to solitary mediation. In 1914, Sri Aurobindo started a journal called Arya. The Philosophical Review was a 64-page monthly periodical written by Rishi Aurobindo and published in India between 1914 and 1921. The majority of the material which initially appeared in the Arya was later edited and published in book-form as The Life Divine', along with The Synthesis of Yoga, The Secret of the Veda, The Foundations of Indian Culture and The Ideal of Human Unity as well as a number of translations of Vedic literature.

In Pondicherry Sri Aurobindo found expression as a spiritual reformer. His transformation had begun towards the becoming the rishi as the world would know him under the name of Sri Aurobindo. Sri Aurobindo's objective now was to integrate his knowledge, thoughts and feelings,as his ideas about human progress and spiritual evolution formed, and as presented in his journal and discourses. These were justified when others took them up. It was a far departure from the fiery politician and the expressive multilingual journalist.

His practice of Integral Yoga was explained as the ability of humans to manifest a divine body through spiritual realisation and works. The objective and path that the rishi propounded was towards liberation. He had often turned towards freedom, and now that freedom had taken a spiritual path. Aurobindo's life philosophy is a synthesis of idealism and realism, naturalism and pragmatism. He utilised the Sanskrit words *Jnana*or knowledge, *Bhakti*or devotion and *Karma* (work ethics). Aurobindo's idea was that cultivation of the three virtues in a human being would lead man to the divine path. His teaching methods included observation, needed for self-discovery and the activity or 'doing' method.

Teaching, he knew, should be undertaken with love and sympathy, in the same way that learning should be undertaken by doing. He advocated discussion and the fact that learning could come from self-experience. Sri Aurobindo considered many aspects of education in depth. He emphasized that education should be in accordance with the needs of contemporary life. He had remained a practical man. His practices exhorted change towards betterment of the individual and collective psyche. The possibility was already within the grasp of men and women.Here mined aware of the possibilities of cultivating a higher mind, the fact that the mind is master and has a direct action on the body. In his explorations, he was able to discover and describe four layers of the mind, namely as *chitta* or full awareness, *manas* or psyche, *buddhi*or the senses that help to understand, and intuition.

Sri Aurobindo's thoughts are encapsulated in the writings which had appeared in the journal Arya. 'The Life Divine' was a series of writings. The book first appeared as a compendium starting in 1919. Since the mid-1920s Rishi Aurobindo met and had begun to collaborate with Mirra Alfassa, 'The Mother' to him and millions worldwide. She had had mystical portents and experiences since childhood. The Mother as a child had also seen visions and prophesies which had unfolded in the course of her life. It included a vision of her meeting with Sri Aurobindo long before the two actually met. Together, Aurobindo and the Mother would found the Sri Aurobindo Ashram in 1926 in orderto further their works. Crowds of people, both Indian and from overseas flocked to the premise to chance upon and adapt their sayings in practice as a way of life. Sri Aurobindo was nominated twice for the Nobel Prize without it being awarded, in 1943 for the Nobel award in Literature and in 1950 for the Nobel award in Peace. He died that same year in 1950, after a long illness.





**Literary Review:**

Rishi Aurobindo's main literary works are The Life Divine and Savitri'. The Life Divine deals with the philosophical aspect of the practice of Integral Yoga, a term coined by the rishi. It speaks of synthesis of yoga, which includes principles and methods of Integral Yoga. The first edition and the first Volume of this monumental work appeared in 1939.

The epic poem in blank verse 'Savitri' portrays Sri Aurobindo's literary and poetic expressive talent.. Its central theme revolves around the transcendence of man as the consummation of terrestrial evolution and the emergence of an immortal supramental gnostic race upon earth. Savitri approaches 24,000 lines when completed.

As a multilinguist, Aurobindo was the earliest Indian to create a major literary corpus in English. His Collected Works'and Autobiographical Notes' include philosophy; poetry; translations of and commentaries on the Vedas, Upanishads, and the Gita; plays; literary, social, political, and historical criticism; devotional works; spiritual journals and volumes of letters, all penned during and beyond the period known as India's literary renaissance.

McDermott's 'Essential Aurobindo"is an introduction to Sri Aurobindo, considered by the author to be one of the most profound and relevant contemporary Asian masters speaking to the world, especially the West. Robert McDermott he is a professor in California . Rishi Aurobindo's vision, he contends,encompass the many strengths and weaknesses of India and the western world. His teachings include the yogas of the Hindu spiritualists: classic the Bhagavad Gita - knowledge, action, devotion and meditation and applies them to the task of world transformation, rather than just spiritual liberation.

**Conclusion:**

Rishi Aurobido's was a life well lived. He thought deeply about all of the decisions he would take and the situations he would find himself in. His English education was not a choice he made, but imposed on him. He corrected his career path intended by his father as soon as he could and reconnected with his roots in India when he was able to return and appreciate the social and historical events that needed to be corrected. Sri Aurobindo wanted to be reunited with his family and even wished for a family of his own, though he moved away at some point. His thoughts on that matter remain private, though he is known to have apologised to his wife who would die after a bout of influenza. Aurobindo remained positive. His time spent in imperial colonial custody was time well spent, he claimed, because that was when his yearning for true freedom found fruit and he chose to go to Pondicherry to find his new-found self and

found the ashram to dwell and work on spiritual uplift-ment. Even today, Sri Aurobindo is considered the saint that he was by people all over the world. In life Aurobindo remained a seeker of the ways and means towards the perfect man, his ideals contemporary, yet ahead of his time.

Bibliography:


1. https://www.boloji.com/articles/13683/mrinalini-sri-aurobindos-forgotten-wife. (2012)Dr. Kavita Sharma.

2. https://en.wikipedia.org/wiki/Bande_Mataram_(publication)

3. http://www.sriaurobindoinstitute.org

4. *Aurobindo, Sri (2005),* The Life Divine, *Pondicherry:* Lotus press. A Cambridge Alumni Database. University of Cambridge.

5. *Aurobindo, Sri (1995)* Savitri: A Legend and a Symbol, Publisher Lotus Press.

6. Collected works (published1972). Sri Aurobindo Birth Centenary Library (SABCL). Pondicherry: Sri Aurobindo Ashram.

7. *Aurobindo, Sri (2006), Autobiographical Notes and Other Writings of Historical Interest.* Sri Aurobindo Ashram Publication Department.

8. *McDermott, Robert A. (1994),* Essential Aurobindo. SteinerBooks.






# अक्षरतत्त्वे जीवविज्ञानम्

डा. बुद्धेश्वरषडङ्गी, कलकाता-35

**गृहे यस्य जगन्नाथो हृदिनारायणस्सदा।**
**भवतापविनाशस्स्यात्तस्य नास्त्यत्र संशयः।।**

अक्षरपुरुषोत्तमदर्शनवाकोवाकपरेऽस्मिन् विद्वत्समवायेऽस्मिन् भारतीयतर्शनस्य वहुचर्च्चिताक्षरतत्त्वविषयस्य पिष्टपेषणाय कृतश्रमोऽयं जनो स्वकण्ठाश्रिताया भारत्या विश्वकल्याणमय्या भासा अक्षरतत्त्वमाश्रित्य शब्दचालनव्यापारवान् अस्ति । तत्रापि जीवविज्ञानस्य कांश्चिद्विन्दून् समुपस्थाप्य जगत्कल्याणप्रतिपित्सूनां पूर्वसुरीणां तृतीयनेत्रोद्भासितं परमरहस्यं भवतापनिवारणपरमिति उपस्थापयितुं कमपि प्रयासं करोति। जीवाक्षररहस्यं प्रसङ्गानुरोधेन व्याख्यातुं भारतीयास्तिकदर्शनपराणि पञ्चविंशतिछन्दोबद्धपद्यानि स्वकृतान्येवात्रोपस्थाप्यन्ते ।

**उपक्रमः**- श्रुतिश्रमश्रान्तानां भारतीयमहर्षीणां सकलप्रयास एव चतुर्षु प्रश्नेषु समाहितोऽस्ति । यथा-

1. दृश्यमन्नयनानन्दकरजगतः कर्ता कः ?
2. तस्य स्वरूपं किम्?
3. को वाऽस्य जगतो भोक्ता?
4. प्रलये जगदिदं कुत्र याति?

अत्र जगदिति पदेन स्थावरजङ्गममात्मकं सर्वं भाववस्तुजालं स्वीकर्तव्यम्। प्राणभृतां जीवानां मध्ये मनुष्यः श्रेष्ठः। मनुष्यस्य जडात्मकं शरीरं पञ्चमहाभूतानां विकारः, यतः तेभ्यस्तद् उत्पद्यते तत्रैव निलीयते । तत्रापि चेतनात्मिका काचित् शक्तिर्वर्त्तते या तु प्राणशक्तिः आत्मा वा इति उच्यते। अयमात्मा अक्षरपुरुषस्य अंशविशेष इति दार्शनिकराद्धान्तः[1] । तत्रापि शरीरे पञ्चविंशतितत्त्वानि वर्तन्ते

[1] अक्षरात् सम्भवतीह विश्वम्(मुण्डक 1.1.7)

इति सांख्याचार्याः[2] । तत्र पुरुषः परमः प्रकृतिः स्वविकृत्या देहाभिमानिनं जीवं भ्रामयति । भगवती गीताऽपि तत्त्वमिदमर्जुनस्य मोहभङ्गाय वदति यथा-

ईश्वरः सर्वभूताना हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।।(१८/६१)

अहङ्काराख्यतत्त्वं सर्वदा जीवान् मायायां पातयति । किन्तु प्रकृतिः स्वमायया सर्वदा तं पराजित्य पुनः कर्मणि नियोजयति । उक्तं च तत्रैव गीतायाम्-

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ।।
स्वभावजेन कौन्तेय निवद्धः स्वेन कर्मणा ।
कर्त्तु नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत्।।(18:59,60)

संकल्पविकल्पात्मकमनसः प्रभावात् जीवस्य दुरवस्था संशयात्मभावश्च, निश्चयात्मिकायाः बुद्धेः प्रभावात् कृत्याकृत्यविचारश्च दर्शनशास्त्रेषु विविधमार्गैरुपन्यस्ताः। अन्ततो गत्वा सर्वैः स्वीकृतमिदं यत् श्रितशरणागतिः भगवति परमपुरुषे योगमार्गेण भक्त्या वा जडशरीराभिमानी जीवात्मा परमेऽक्षरे निलीयते इति । किञ्च महर्षिव्यासेनापि तत्रैव गीतायां रहस्यमिदमुपन्यस्तं यथा -

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात् परां शान्तिस्थानं प्राप्स्यति शाश्वतम्।।18/62

अस्माकं प्रसङ्गस्तु अक्षरतत्त्वे जीवस्य स्थितिः कृतिश्च। अत्र विज्ञानपदेन जीवस्य स्वरूपविज्ञानं कर्मविज्ञानञ्च गृहीते स्तः । अतएव अस्य विमर्शस्य पञ्च विन्दवः परिकल्पयितु शक्यन्ते यथा –

1.अक्षरपदविमर्शः
2. अक्षरब्रह्मणः स्वरूपम्
3. जीवस्यस्वरूपम्

[2] प्रकृतेर्महस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥





4. जीवस्य कृत्याकृत्यविमर्शः
5. शरणागतिः मुक्तिश्च

**1.अक्षरपदविमर्शः -**

एक एवाक्षरं ब्रह्म यस्माद् व्यक्तं जगत् सदा।
न क्षरति कदाप्येदं तस्मादक्षरमुच्यते ।।1
अव्यक्तोऽयं विश्वकर्त्ता गुणातीतः परात्परः।
निर्माति स्वेच्छया विश्वं संहरति च सोऽक्षरः।।2
क्षरधर्मारताः भावाः विलयं यान्ति यत्र ते ।
पुण्यक्षये पुनस्तस्माज्जायन्ते धरणीतले।।3
योगिनां ज्ञाननेत्रस्य लक्ष्योऽयं परमो यतः।
अक्षरब्रह्मसंज्ञा तत् प्रवदन्ति बुधा मुदा।।4

**2. अक्षरब्रह्मणः स्वरूपम्**

अजोनित्योऽविनाशी यः सनातनो महान् सुरः।
गुणातीतः सदा शान्तः सर्वपूर्णोऽशरीरकम्।।5
यस्मात्क्षरन्ति सर्वाणि वस्तुनि जगतस्सदा।
प्रलये च निर्लिप्तानि तत्रैव परमेऽक्षरे।।6
स्वेच्छेया सृज्यते विश्वं स्वेच्छया हार्यते च तत्।
कालक्षयकरोयोऽयं जीवात्मनो गतिर्हि सः।।7
मोक्षार्थिनां सदा लक्ष्यं पुरुषे यत्र वर्तते।
तवेदाक्षरब्रह्म तत् लोक्यते योगिभिस्सदा।।8

**3. जीवस्य स्वरूपम्**

कलेवरे समागत्य तिष्ठति निश्चलो हृदि ।
परमाक्षरतो योऽय जीव इत्युच्यते बुधैः।।9
ज्ञानकर्मेन्द्रियैर्बद्धः भूतविकारगात्रकः।
अहंकाराश्रितो भुङ्क्ते मनसा कर्मजं फलम्।।10
गुणत्रयावृत्तं लोकं पश्यति कर्मसंश्रयम्।

त्रितापतप्तविश्वं च संशयात्मा पदे पदे।।11

मायापाशशतैर्बद्धे व्याकुलो स्मरति श्रियम् ।

कामक्रोधादि युक्तोऽयं क्लेशयुक्तश्च सर्वदा।।12

**4.जीवस्य कृत्याकृत्यविमर्शः**

रजस्तमोगुणाभ्यान्तु निगडितस्तु मानवः।

अहङ्कारप्रभावेण मायाग्रस्तः पदे पदे।।13

हिंसाद्वेषपरोनित्यं कृत्येऽसुरे मतिस्सदा।

यज्ञदानतपस्यासु रतिर्नालोक्यते ततः।।14

परोपकारककृत्ये दैवयागादिषु रतिः।

परमे पुरुषे भक्तिर्नामजपादिके मतिः।।15

प्राणायामादिभिर्नित्यं मनोनिग्रहणं यदा।

कर्माकर्मविकर्मादिज्ञानञ्च लभते गुरोः।।16

श्रुत्युपदिष्टयागादौ गतिश्च महती तथा।

त्रितापमुक्तयोगीव लभते परमां गतिम् ।।17

**5. शरणागतिः मुक्तिश्च**

शरणागतिरेवात्र लोकेऽस्ति तारिका सदा ।

तस्मात्मोक्षार्थिनां नित्यं रतिस्स्यात् परमाक्षरे ।।18

सहायकग्रन्थसूची

1.श्रीमद्भगवद्गीता स्वामिनारायणभाष्यम्,प्रकाशक- स्वामिनारायण अक्षरपीठ आमदावाद, 2019 ।

2. श्रीमद्भगवद्गीता,तत्त्वविवेचनी, प्रकाशक- गीताप्रेस, 2018 ।

3. श्रीमद्भगवद्गीता, शांकरभाष्यम्, प्रकाशक- गीताप्रेस, 2018

4.ईशादि नौ उपनिषद्, प्रकाशक- गीताप्रेस, 2012 ।



व्यासश्रीः Vol. XX ISSN 2320-2025

# The Excellence of listening to and chanting the *Śrīmadbhāgavatapurāṇam*

- Dr. Jewli Boruah
Assistant Professor
Deptt. of Sanskrit
Jhanji H.N.S. College
Sivasagar, Assam, India
jewliboruah123@gmail.com

**Abstract:**

The *purāṇas* are a very important part of the Hindu sacred literature. They enable us to know the importance of the philosophy and religion of the *Vedas*. There are 18 *purāṇas* known as *Mahāpurāṇas* namely, *Vāyupurāṇam*, *Brahmāṇḍapurāṇa*, *Mārkaṇḍeyapurāṇa*, *Viṣṇupurāṇa*, *Matsyapurāṇa*, *Bhāgavatapurāṇa*, *Kurmapurāṇa*, *Vāmanapurāṇa*, *Liṅgapurāṇa*, *Varāhapurāṇa*, *Padmapurāṇa*, *Nāradīyapurāṇa*, *Agnipurāṇa*, *Garuḍapurāṇa*, *Brahmapurāṇa*, *Skandapurāṇa*, *Brahmavaivartapurāṇa* and *Bhaviṣyapurāṇa* or *Bhaviṣyatpurāṇa*.

All the *purāṇas* contain eulogy of the gods i.e. *Brahmā*, *Viṣṇu*, *Maheśwar* etc. The references are found in the *līlās* (exploits) of various gods in each of them. These *purāṇas* have their own quality and also social, cultural and historical importance. In our study, an attempt has been made to highlight the excellence of listening to or chanting (*Śravaṇa-Kīrtana Mahima*) *Śrimadbhagavatapuraṇa*.

**Key-words**: Excellence, *Purāṇa*. *Śrīmadbhāgavatapurāṇa*, listening to, chanting etc.

**Introduction:**

The *Śrīmadbhāgavatapurāṇa* (or *Bhāgavatapurāṇa*) of *Vyaāsa* is considered as the best of the *purāṇas* (*purāṇasārya*). It is the most famous in India. It consists of 18 thousand *ślokas*, distributed amongst 332 chapters and divided into 12 cantos (*skandhas*). Actually, the *Bhāgavatapurāṇa* is a continuous conversation between king Parīkṣita, the grandson of Arjuna and Śukamuni for seven days. The king Parīkṣita was cursed by a Brāhmin that he would die within seven days. So, he decided to give up his kingly duties and searched for the purpose of life. Then he met the great saint Śuka.

Śukamuni explained to him that one's goal in life is to understand the absolute truth that is personified as Lord *Kṛṣṇa*, the supreme God.

This *purāṇa* focuses on the *Bhakti Yoga* means the devotion to the Supreme Lord expressed through love. Here, Lord *Viṣṇu* or *Kṛṣṇa* is described as the Supreme and therefore all the incarnations of *Viṣṇu* and their *līlās* described from the beginning to the last of this *purāṇa*. *Bhakti* means the sincere devotion of *Jīva* (individual) to *Paramātman*, the Supreme Soul or God. Through the practice of *Bhakti*, the *Jīva* can free itself from the afflictions and attain Eternal Bliss. Here, in the *Bhāgavatapurāṇa*, *Bhakti* is declared superior to the other paths of attaining salvation like *Jyāña Yoga*, *Karma Yoga* etc. *Bhakti Yoga* (the path of devotion) is also prescribed in the *Śrīmadbhāgavatagītā* .

*mayyāveśya mano me māṁsa nityayuktā upāsate /*
*śraddhayā parayopetāste me yuktatamā matāḥ //* [1]etc.

There are nine different ways of practices of *Bhakti* through which one can practice devotion to God. These are *Śravaṇa* (listening), *Kīrtana* (chanting), *Smaraṇa* (meditation), *Archana* (worship), *Padasevana* (adoration at the feet of the God), *Dāsya* (service), *Sakhītva* (intimacy), *Vandana* (prayer), *Deha arpaṇa* (self surrender). Among these the *Śravaṇa* and *Kirtana* are treated as the most important, as everybody can participate easily.

*śravana kīrtanam viṣṇu smaraṇam pādasevanam/*
*arccanam vandanam dasyam sakhyamātamanivedanam//*[2]

This *purāṇa* bears the essence of the Vedic literature and *Vedānta* Philosophy. This is declared in *Śrīmadbhāgavata* itself-

*sarva-vedāntasāram hi śrībhāgavata iṣyate tad/*
*rasāmṛta tṛptasya nanyatra syād ratiḥ kvacit//*[3]

It is the *Bhāgavatapurāṇa*, where the various schools of devotions and all the fields of knowledge are existed. Therefore, people listen to or chant (*Śravaṇa-Kīrtana*) this *Purāṇa* very respectfully and get devotion with knowledge.





**Objective:**

The objectives of the study are to focus on the importance of *Śrīmadbhāgavatapurāṇa*, and the excellence of listening to and chanting this *purāṇa*.

**Methodology:**

The descriptive and analytical methods are used in this study. Both primary and secondary data have been used. The secondary data are mainly taken from various books, articles, journals etc. The primary data are mainly taken from the original works.

**Discussion:**

There is no any other interesting book like the *Bhāgavatapurāṇa* which is full of knowledge and devotion. Therefore, Vyāsadeva says in the beginning of the book-

*nigamakalpatarorgalitam phalam śukamukhādamṛtadravasamyutam /*
*pivatabhāgavatam rasamālayam mūhuraho rasikāḥ bhūbi bhābukaḥ //*[4]

The *Bhāgavata māhātmya* appears in the *uttarakhaṇḍa* of *Padmapurāṇa*. It states that among all the *Purāṇas* the *Bhāgavata* is the best, in what by every works of Kṛṣṇa is sung in various ways by the sages-

*purāneṣu tu sarveṣu śrīmadbhāgavatampara/*
*yatra pratipadam kṛṣṇo gīyate bahudarśibhih//*[5]

Moreover, the result of respectfully chanting and listening to the same is the subject matter of this book.

In the *Bhāgavatapurāṇa*, the greatness of Lord *Viṣṇu* is depicted beautifully and one can make his mind calm, remove any anxiety by chanting or listening to it. Therefore, it is said that the excellence of listening to or chanting (*Śravaṇa-Kīrtana Mahimā*) the *Bhāgavatapurāṇa* is important for the welfare of the common people. This *Purāṇa* is called the substance of all the sacrifices, *śāstras*, penances, acts of charity etc.

*idam hi puṁsaḥ tapasaḥ śrutasva vā sviṣṭasva suktasya ca buddhidattayoh/*
*avicyutoarthaḥ kavibhi nirupitoyaduttamaślokaguṇānukīrtanam//*[6]

The Lord Viṣṇu or Kṛṣṇa is the ultimate source of creation, sustenance and dissolution of the universe. Hence, it is said by the learned people that

this *purāṇa* fulfills all the desires of the devotees like the *Kalpavṛkṣa* (a wish fulfilling divine tree). Again, the *Gaṅgā* is considered the best among the rivers, like that Lord *Kṛṣṇa* among the *devatā*s and the *Bhāgavatapurāṇa* among the all *purāṇas*. The people who chant this *purāṇa* with faith, knowledge and asceticism, they have no interest on the other *śāstras*. In the same way, who listen to this *purāṇa* respectfully or make others listening to it, their hearts gets purified by chanting this *purāṇa*, the *Brāhmaṇa* gets virtuous-mind, the *Kṣhatriya* is able to get the kingdom, the *Vaiśya* obtains the prosperity and the *Śūdra* releases from all sins.

Therefore, in the *Padmapurāṇa*, it is said about the excellence of the *Bhagavatapurāṇa* that the people who want salvation they must chant one of the *ślokas* or half of a *śloka* or one *pāda* of a *śloka*. They, who do not listen to or chant *Bhāgavatapurāṇa* in their lifetime, make their life vain.

*ājanmamātramapi yena śaṭhena kiñcincittam*
*vidhāya śukaśāstrakathā na pītā/*
*cāṇḍālavatcca khakhavad varanena nītam*
*mithyā svajanmajananījanaduḥkhanājā//*

Through listening or chanting this *purāṇa*, people can make their unsteady minds stable and go towards attaining the *Caturvarga* viz. *Dharma, Artha, Kama* and *Mokṣa*. Thus, they make their lives successful; it is also mentioned in the *Bhāgavatapurāṇa*.

*akāmah sarvakāmo vā mokṣhakāma udāradhīḥ/*
*tībreṇa bhakti yogena yajet puruṣam param //*[8]

The devotion to Lord *Kṛṣṇa* is the easiest means for relieving from the worldly pain. Therefore, the listening to and chanting the sportive deed of Lord Kṛṣṇa is considered as best. It is described as –

*tasmādekena manasā bhagavān sātvatām patiḥ/*
*śrotavyaḥ kīrtitavyaśca dhyeyaḥ pūjyaśca nityadā//*[9]

*saṁsārasindhumatidustaramuttītīrṣorṇārnvaḥ*
*plava bhagavataḥ puruṣottamasya/*
*līlākathārasaniṣevaṇamantareṇa*
*puṁso bhavedvividha duḥkhadavārditasva//*[10]





Again in reference to the listening of the *Bhāgavatapurāṇa* it is found in the *Padmapurāṇa* that -

*yairna śrutam bhāgavatam purāṇam*
*nārādhito yaih puruṣaḥ purāṇaḥ/*
*hutaṁ mukhe naiva dharāmarāṇām*
*teṣām vṛthā janma gatam narāṇām//*[11]

(The life of those men who have not listened to *Bhāgavata*, have not worshipped the *puruṣaḥ purāṇaḥ* (Viṣṇu), have not offered oblations into the mouth of the *brāhmaṇas* ).

The *Padmapurāṇa* also describes about the Excellence of the listening to *Bhāgavatapurāṇa* for one week. All the sins are removed, result of penance is obtained and evils are gone away by listening or chanting the *Bhāgavatapurāṇa*. Listening or chanting *Bhāgavatapurāṇa* for one week is the best deed in the age of *Kali* to destroy the sins of the entire world and people can get salvation from the circle of birth and death. Listening or chanting one *śloka* or half of a *śloka* or one *pada* of a *śloka* enables one to get result of performing *Rājasūya* or *Aśvamedha Yajña*. Hence, it is said that for week listening to or chanting its result is boundless.

*ślokārdham ślokapādam vā paṭhed bhāgavatam ca yaḥ /*
*nityam puṇyamvāpnoti rājasūyaścamedhayoḥ//*[12]

*aśvamedha sahasrāṇi vājapeyaniśatāni ca /*
*śukaśāstrakathāyāśca kalāṁ nārhati ṣodhaśīm//*[13]

The Lord *Kṛṣṇa* stays at once in the heart of a devotee when he listens to the *Bhāgavatapurāṇa*. He, who has never listened to or chanted the *Bhāgavatapurāṇa*, does not get salvation from the world. He falls in the circle of birth and death again and again. He is censured by the learned people.

*jīvan sabo nigaditaḥ sa tu pāpakarmā*
*yena śrutam śukakāthavacanam na kiñcit/*
*dhik tam naram paśusamam bhūbi bhārabhūta*
*mevam vadanti divi devasamājamukhyāḥ//*[14]

**Conclusion:**

The place, where the discussion is made on the *Bhāgavatapurāṇa* is turned to a holy place. The people of that place get released from their sins. Thus, from the foregoing discussion, it is clear that there is a great Excellence of the listening and chanting *Bhāgavatapurāṇa*. Therefore the Viṣṇu or Kṛṣṇa devotees eagerly and respectfully listen to and chant this *purāṇa*. The trend of the listening to and chanting *Bhāgavatapurāṇa* is prevalent present day also. The King Parīkṣita also got salvation from this world by listening to this *Mahāpurāṇa*.

[1] *Śrīmadbhāgavatagītā*, XII. 2
[2] *Bhāgavatapurāṇam*, 7.5.23
[3] *Ibid.*, 12.13.15
[4] *Ibid.*, 1. 1. 3
[5] *Padmapurāṇam*.VI. 193.3
[6] *Bhāgavatapurāṇam*. 1. 5. 22
[7] *Padmapurāṇam*. VI, 3. 42
[8] *Bhāgavatapurāṇam*, 2.3.10
[9] *Ibid*, 1.2.14
10 *Ibid*. 12.4.40
[11] *Padmapurāṇam*. VI, 3.
[12] *Ibid*, VI. 3.34
[13] *Ibid*, VI. 3.30
[14] *Ibid*, VI. 3.43

## BIBLIOGRAPHY

**Original works:**

*Śrīmadbhagavata*,ed.by Goswami, Dr. Kesavananda Dev. Banalata, Panbazar. Assam. Guwahati-21. Assam, 8th edn., 2007.
*Śrīmadbhāgavatapurāṇam*.ed. by Goswami. Dr. Malinee. Publication Board Assam. Guwahati-21, Assam, 1st edn., 2005.
*Bhāgavatbhāvārthadīpikā*, Goswami, Dr. Malinee (ed.). Publication Board Assam, Guwahati-21, Assam. 1st edn., 2005.
*Padmapurāṇa*, Vol.-09 ed. by Joshi.M., Motilal Banarsidass,1991.
*Śrīmadbhāgavatgītā yathārtha*(translation of *Bhagavad Gita as it is* )by Dr. M. M. Sarmah. Bhaktivedanta Book Trust, 2017.

**Modern Works:**

Bejbarua, L.. *Tattvakathā*. Banimandir, Guwahati-3.
Mahanta. Pradipjyoti (ed.), *Śrīmanta Śaṅkardeva: Samāj āru Saṁskriti*. Puberun Prakash, Guwahati-1, 2002.
Majumder, Dr. Bimal, *Purāṇar Paricay*. Chandra Prakash, Guwahati-1, 1st edn., 2002.
Sastri, D., *Bhāgavat Tatva Darśana*, Published by Golaghat Jila Sahitya Sabha, 2002.
Tripathi, Dr. K.M. *Purāṇaparyālocanam*, Chaukhamba Surabharati Prakashan, Baranasi, 1993.





# भागवतधर्मस्येतिहासचर्चायां द्वितीयचन्द्रगुप्तस्य 'चक्रविक्रम' इति मुद्रायाः गुरुत्वम्

सुस्मिता गोस्वामी

Assistant Professor

Department of Sanskrit

Lady Brabourne College

susmimld@yahoo.com

विषयसंक्षेपः भारतवर्षे भक्तिमूलकेषु धर्मेषु भागवतधर्मस्य गुरुत्वपूर्णमस्तित्वमिति गवेषकाणां मते धर्मस्यास्य विवर्तनमस्माकं दृष्टिपथमायाति। भागवतधर्मस्य इतिहासानुसन्धाने गुप्तसम्राजः द्वितीयचन्द्रगुप्तस्य अवदानमैतिहासिकाः स्वीकृतवन्तः। विशेषतः तेन प्रचारितासु मुद्रासु चक्रविक्रममुद्रा उल्लेखनीया यत्र तत्कालीनः धर्मानुरागः प्रतिफलितोऽभवत्। गवेषकाणां मते द्वितीयचन्द्रगुप्तस्य चक्रविक्रममुद्रायां विष्णोः anthropomorphic रूपस्य रूपायनं प्रदर्शितमभवत्। अस्मिन् प्रबन्धे भागवतधर्मस्य इतिहासचर्चायां एतस्याः मुद्रायाः वैशिष्ट्यं गुरुत्वञ्च संक्षेपेणालोचयिष्यामि।

प्रबन्धे व्यवहृतानि विशिष्टानि पदानि- भागवतधर्मः, द्वितीयचन्द्रगुप्तः, चक्रविक्रममुद्रा, आयुधपुरुषः, [illegible] सुदर्शनचक्रं च इति।

भूमिका: भारतीयोपमहादेशे भक्तिमूलकेषु धर्मसम्प्रदायेषु भागवतधर्मस्य गुरुत्वं सर्वैर्विदितम्। ब्राह्मण्यधर्मस्योपासकानां मते अस्य धर्मसम्प्रदायस्य प्राणभूतो देवो विष्णुः तेषां सृष्टिः स्थितिः इति। भागवतधर्मस्य विस्तारे उपमहादेशस्यास्य विविधानां राजवंशानां [illegible] गुप्तवंशेषु गुप्तनृपाणामवदानमतुलनीयमिति मन्यन्ते ऐतिहासिकाः। भागवतधर्मस्य इतिहासचर्चायां गुप्तयुगं [illegible] साहित्यचर्चायां स्थापत्य-भास्कर्य-चित्रकलासु च यत्सूत्कर्षं देशेऽस्मिन् परिलक्ष्यते तत्र गुप्तनृपाणामवदानं न केनापि विस्मर्यते इति। शिल्पकला अनेनैव काले उन्नतेः शिखरमारूढा भवति। तदा तत्कालीनया शिल्पकलया सह धर्मानुशासनं धर्मविषयका धारणापि च सम्पृक्ता अभवत्। गुप्तयुगस्य प्रधानवैशिष्ट्यमासीत् भक्तिभावाश्रितायाः धारणायाः क्रमवर्धनम्। गुप्तयुगं

मि।

भक्तिप्रधानधर्मेषु भागवतधर्मस्य प्राधान्यमस्माकं नयनपदवीमापतति। धर्मस्यास्य प्रधानोपास्य देवो भगवान् विष्णुरिति।अस्य विष्णोरूपासकाः गुप्तनृपाः स्वेषां ' परमभागवत' इत्यभिधया वर्णितवन्तः। तेषामभिलेखेषु मुद्रासु च परमभागवत इत्यभिधायाः प्रयोगोऽस्माभिः दरीदृश्यन्ते ।एतेषु गुप्तनृपेषु द्वितीयचन्द्रगुप्तो भागवतधर्मप्रचारे अग्रणी आसीदिति ऐतिहासिकप्रमाणेभ्यः ज्ञायते।

## द्वितीयचन्द्रगुप्तेन प्रचलीकृता मुद्राः

प्राचीनभारतीयेतिहासात् ज्ञायते समुद्रगुप्तस्य उत्तराधिकारी द्वितीयचन्द्रगुप्तो विक्रमादित्यनाम्नापि अभिहितः। अध्यापकरणबीरचक्रवर्तीमहोदयोऽभिलेखप्रमाणेभ्यः एतत् विज्ञापयति 56 इति गुप्ताब्दात् अर्थात् 376 ईसवीयाब्दात् द्वितीयचन्द्रगुप्तस्य शासनकार्याणि प्रारभ्यंते इति। [1] प्रथितयश सां गुप्तनृपानां मध्ये द्वितीयचन्द्रगुप्तः स्वकीयवीर्येण गौरवपदवीमारोहति।शासकरूपेण तस्य वीर्यवत्तायाः निदर्शनं पश्चिमभारतवर्षात् शकक्षत्रपनृपाणां समुच्छेदनमिति।तस्य वीर्यस्य साक्ष्यं प्राचीनभारतीयमुद्रासु विधृतमस्ति।शकक्षत्रपैः प्रचारितानां मुद्राणां तुल्याः रौप्यमुद्राः तेन निर्मिताः।[2] भागवतधर्मस्य विकाशविवर्तनयोरितिहासचर्चायां द्वितीयचन्द्रगुप्तेन प्रचलीकृतानां मुद्राणां गुरुत्वमनस्वीकार्यम्। मुद्रातात्त्विकश्रीन्द्रनाथमुखोपाध्यायमहाभागस्य मतानुसारमस्य राज्ञः शासनकाले अष्टविधानाम् मुद्राणां प्रचलनमभवत्। ता यथा standard -archer -lion-slayer- conch- king-queen-Horseman इत्यादयश्च।अपि तु छत्र-चक्रविक्रम इत्यभिधेयाः मुद्राः उल्लेखनीया इति। स्वर्ण-ताम्र-रौप्यप्रभृतीनां धातूनां व्यवहारः तस्य मुद्रास्वभवत्। lead इति धातुनिर्मिता मुद्राः तस्य समये प्रचलिता आसन्। [3] एतासु मुद्रासु भागवतधर्मस्य इतिहासचर्चायां चक्रविक्रम इति मुद्राणाम् विशेषतात्पर्यं स्वीकृतं विबुधैः।विषयोऽयं निबन्धेऽस्मिन् मया आलोच्यते।विषयस्य गर्भे प्रवेशात् प्राक् केषाञ्चित् गुरुत्वपूर्णतथ्यानामालोचनाया अवकाशोऽस्ति।

## धर्मीयेतिहासानुसन्धाने मुद्राणां गुरुत्वम्

इतिहासानुसन्धाने पुरातात्त्विकप्रमाणसमूहेषु मुद्राः विशेषतया व्यवहृता इति। न केवलं राजनैतिक-सामाजिक-अर्थनैतिकेतिहासचर्चायामपि तु मानवानां धर्मानुकृतिमन्वेषणार्थं मुद्राणां विशिष्टा मर्यादा ऐतिहासिकैः स्वीकृता इति।मानवसभ्यतायाः सांस्कृतिकचेतनायाः अनुसन्धाने व्यापृताः विद्वांसो मुद्राभिः गवेषणाक्षेत्रं नवदिगन्तमुन्मोचयन्ति।मुद्राणां पश्चाद्भागे देवानां मूर्तयः उत्कीर्णा अभवन् यस्मात् मानवानां धर्मविश्वासमवगम्यते।

गुप्तयुगे प्रस्तुतानां मुद्राणामुत्कर्षं मुद्रातात्त्विकैः स्वीकृतः।गुप्तकालीनस्य भारतवर्षस्य सांस्कृतिकोन्नयनस्य साक्ष्यं मुद्रासु विधृतमस्ति।विशेषतः मूर्तितत्त्वस्याध्ययने मुद्राणां गुरुत्वमतुलनीयमिति मन्ये।विषयेऽस्मिन् Foucher

चित्





Coomerswamy इति प्रमुखैः पण्डितैः कृता गवेषणा उल्लेखनीयाः।मूर्तितत्त्वचर्चायां मुद्राणां गुरुत्वप्रसङ्गे भास्करचट्टोपाध्यायमहाभागस्याभिमतं स्मर्तव्यमत्र-" ... the numismatic representation of the deities which was often presumably based upon early sculptural representation , gives us an idea about the early stages in the evolution of image making."[4] प्राचीनभारतवर्षस्य जनतामुद्रानां धर्मविश्वासमन्वेषणाय मुद्रासु उत्कीर्णानां aniconic symbol इति अमूर्तप्रतीकानां मूर्तीनाञ्च गुरुत्वं बहुलमिति पण्डितानामाशयः।अपि तु anthropomorphism अर्थात् देवा नरमूर्तिधारिणो मानवगुणयुक्ताश्च इति भावनायाः निदर्शनं गुप्तमुद्रासु परिलक्षितमेव।विशेषतः द्वितीयचन्द्रगुप्तस्य चक्रविक्रम इत्यभिधेयासु मुद्रासु विष्णोः anthropomorphic इत्यस्य रूपस्य प्रयोगोऽभवत्।

## द्वितीयचन्द्रगुप्तस्य चक्रविक्रममुद्रा

गुप्तनृपाणां प्रचारितासु मुद्रासु तेषां धर्मानुरागः प्रतिफलितोऽभवत्। एतेषु नृपेषु द्वितीयचन्द्रगुप्तस्य लेखमालायां तस्य भागवतधर्मं प्रति आनुगत्यमस्माकं दृष्टिपथमायाति।तेन प्रचारितासु कासुचित् रौप्यमुद्रासु परमभागवत इति नाममुद्राक्षरस्योल्लेखो वर्तते। यथा-" परमभागवत महाराजाधिराज श्रीचन्द्रगुप्त विक्रमादित्य" इति। [5] भगवत् इति पदस्य निर्वचनं कोषग्रन्थानुसारमनेन साधितम् यथा "भगवान् हरि भगवती दुर्गा वास्य देवतेति भगवत् इति अण्"।[6]अतो भगवत् इति शब्दस्योत्तरं 'सास्य देवता '( 4/2/24) इति पाणिनीयसूत्रानुसारेण अण् इति प्रत्यययोगेन भागवत इति पदं निष्पन्नम्।ऐश्वर्याणां षड्भगानां धारकतया भगवान् एव विष्णुः।विष्णुमभि तस्या भक्तेः प्रकाशः तेन प्रचारिताभिः चक्रविक्रम इति मुद्राभिर्ज्ञायते । Boyana Hoard इति नामधेयस्थाने द्वितीयचन्द्रगुप्तस्य चक्रविक्रममुद्राणां प्राप्तिरभवत्। स्थानमिदमधुना राजस्थानप्रदेशस्य भरतपुरमिति।चक्रविक्रम इति स्वर्णमुद्राणां प्राप्तिः केवलं Boyana Hoard इत्यस्मिन् स्थाने अभवत्। अस्य मुद्राविशेषस्य न किमपि द्वितीयनिदर्शनं संग्रहालयेषु व्यक्तिसंग्रहेषु वास्ति। [7] किन्तु विषयेऽस्मिन् मतपार्थक्यं विद्यते।प्रशान्त श्रीवास्तवमहाशयस्य मतेन 1960 ईसवीयाब्दे उत्तरप्रदेशस्य जौनपुरजिलायां शाहगञ्ज इति स्थाने एकस्य स्वर्णकारस्य समीपे अस्या मुद्रायाः अपरमेकं निदर्शनं प्राप्तम्।देवेन्द्रहाण्डामहोदयोऽपि विषयास्यास्योल्लेखं कृतवान्।किन्तु तथ्यस्यास्य प्रमाणविषये संशयमस्ति।[8] अस्याः मुद्रायाः सम्मुखभागे ज्योतिर्मण्डलेषु दण्डायमानस्य भगवतो विष्णोः सम्मुखे अञ्जलिबद्धावस्थायां स्थितस्य द्वितीयचन्द्रगुप्तस्य प्रतिकृतिमुत्कीर्णमस्ति। [9] अस्या मुद्रायाः पश्चाद्भागे ब्राह्मी इति अक्षरैः चक्रविक्रमपदमुत्कीर्णमेव।ए.एस्.अल्टेकरमहाभागस्य मतानुसारमत्र विष्णुश्चक्रपीठस्थाने

चित्

दण्डायमानासीत्।तस्य शरीरं व्याप्य वृत्ताकारवलयद्वयं वर्तते। स वामहस्तेन गदां धारयन् दक्षिणहस्तेन च सम्मुखे स्थिताय अञ्जलिबद्धकरयुक्ताय पुरुषाय वृत्ताकारं वस्तुत्रयं ददातीति।[10] (चित्रम्: 1)



(चित्रम्.1.)

( Sivaramamurti C." Chakravikramaudis", " The Weapon of Viṣṇu" Artibus Asiae, Vol. 18, No.2, pp.128-136 1955, www.jstore.org/stable/3248799

यद्यपि अस्यां मुद्रायां स्थितं देवमूर्तिमधिकृत्य विदुषेषु मतद्वैधं जायते तथापि चक्रवर्तीमहाभागा चक्रविक्रममुद्रासु उत्कीर्णितः देवमूर्त्याः आकृतिविषये एवमुक्तवन्तो-" ... Chakravikrama type of gold coins of Chandragupta II shows a deity standing within a double rimmed wheel which is oval in shape and goes round the entire person of the deity above the knees ... The deity is bare-bodied except for a dhoti but wears crown, necklace and wristlets. He holds a mace ( gada) in the left hand hanging by his side and offers by his right , bent and raised up, three round objects held in his palm to the king standing facing him with right hand extended to receive the divine gift."[11] ततः शत्रुघ्नशरणसिंहमहोदयः अस्माकं ज्ञापयति अस्यां मुद्रायां चक्राभ्यन्तरे न कश्चन वर्तते किन्तु मुद्रायाः पृष्ठभागे विक्रम इति विरुदस्य उल्लेखोऽस्ति। अतिहासकाः पादनामतो द्वितीयचन्द्रगुप्तेन विक्रम इति अभिधा व्यवहृतेति। तस्य स्वर्णमुद्रासु अन्याः लाञ्छनप्रयोगोऽभवत्।पुनः तस्य Horseman Lion-Slayer इत्यभिधेयासु मुद्रासु अजितविक्रमसिंहविक्रमप्रभृतीनां नामसूचकाक्षराणां प्रयोगोऽस्माकं दृष्टिपथमायाति।[12] चक्रविक्रममुद्रासु अङ्कितस्य देवस्य स्वरूपविषये पण्डितानां वैमत्यमस्ति।विविधमतेषु अल्तेकरमहाभागः

कि[illegible]





देवमिममादौ विष्णुरूपेण वर्णयति।किन्तु जितेन्द्रनाथबन्द्योपाध्याय-शत्रुघ्नशरणसिंह-स्वातीचक्रवर्ती-परमेश्वरीलालगुप्तप्रमुखाः पण्डिता मुद्रास्थितं देवं भगवतो विष्णोः आयुधपुरुषरूपेण अर्थात् चक्रपुरुषतया सूचितवन्तः।गुप्तमुद्रासु आयुधपुरुषस्य भावना स्फुटीभवति। शत्रुघ्नशरणसिंहमहोदयस्य मते भागवतधर्मस्य उपास्यदेवस्य विष्णोः उपस्थापनं गुप्तमुद्रायां न भवतीति।किन्तु एतासु मुद्रासु विष्णो anthropomorphic इति रूपं प्रकाशितमेव।[13]

मूर्तितत्त्वानुसारं साधारणतया वज्र-शक्ति-खड्ग-पाश-गदा-त्रिशूल-पद्म- प्रभृतयो देवानां हस्ते आयुधरूपेण विद्यन्ते। एतेषु आयुधेषु केचन पुरुषरूपेण केचन नपुंसकरूपेण केचन वा नारीमूर्तिं गृहीत्वा च प्रकाशिता भवन्तीति।गवेषकाणां मते इन्दो-पार्थियानां नृपाणां मध्ये Maues इत्यस्य राज्ञः ताम्रमुद्रासु प्राचीनतमस्य आयुधपुरुषस्य मूर्तिः उत्कीर्णा आसीदिति।[14] सृष्टितत्त्वस्यान्तर्निहितदार्शनिकभावस्य प्रतिफलनं एतेषामायुधपुरुषाणां प्रतीकत्वस्य मध्ये निहितमेव। विष्णुधर्मोत्तरपुराणस्य प्रतिमालक्षणवर्णनायां अस्य प्रमाणं लभ्यते। तत्रोक्तं-

नैतान्यायुधजातानि परमार्थेन यादव।

खं विजानीहि देवस्य करे शङ्खो महाभुजः॥ इति।

चक्रं जानीहि पवनं गदां पादमध्ये व्यवस्थितम्।

महाभूतान्यथैतानि न्यस्तानि हरिणा नृपः॥ इति।[15]

आयुधस्योपरि देवत्वारोपणं जनानां मूर्तिपूजाविषयकमाग्रहं द्योतयति।विष्णुना सह चक्रपुरुषस्य सम्बन्धं विद्यते। गुप्तकालीनेभ्यः मुद्रागतप्रमाणेभ्यो ज्ञायते गदाचक्रयोरुपरि देवत्वमारोपितम्। चक्रपुरु यो विष्णो anthropomorphic इत्येवं रूपमिति मूर्तितात्त्विका मन्यन्ते। कथं चक्रं विष्णोः आयुधतया निर्दिष्टमित्यस्मिन् विषये आलोचनायाः प्रयोजनमस्ति। महाजागतिकं सत्यं वर्णयितुं शास्त्रादिषु प्रतीकस्य व्यवहारो निर्दिष्टमेव। तत्र चक्रं धर्मस्य प्रतीकस्वरूपम्।संसारचक्रं द्योतयितुं चक्रमिति प्रतीकं व्यवहृतम्। अपि तु आयुधरूपेण चक्रस्य व्यवहारो भवति यस्य गतिर्मनसः वेगात् बलवती।अस्मात् ज्ञायते चक्रं निखिलविश्वस्य मनसः प्रतीकभूतं यत् अस्माकं शत्रुरूपं दुःखप्रदायकमावेगसमुदायं विनाशयतीति।[16] विष्णोः आयुधरूपस्य सुदर्शनचक्रस्य माहात्म्यं इतिहासपुराणेषु वाबच्यते।विष्णोः आयुधरूपेण चक्रस्य व्यवहारे कारणमस्ति।भागवतधर्मस्य विवर्तनधारायां दृश्यते आदित्यचेतनायाः व्याप्तिः विष्णोरुपासनायां निहिता आसीत्।नारायणस्य ध्यानमन्त्रेऽपि " सवितृमण्डलमध्यवर्ति

गित्

नारायण इति " इति आदित्यचेतना प्रकाशिता भवति।माध्यन्दिनादित्यो विष्णुः श्रुतौ काव्ये पुराणादिषु च बहुधा स्तूयते।विष्णुपुराणे विष्णौ सूर्यशक्त्याः प्रकाशनस्य वर्णनमस्माकं दृष्टिं नन्दयति।तथोच्यते-

" सैव विष्णुः स्थितः स्थित्यां जगतः पालनोद्यतः।

ऋग्यजुःसामभूतोऽन्तः सवितुर्द्विज तिष्ठति॥ इति।

मासि मासि रविर्योयस्तत्र तत्र हि सा परा।

त्रयीमयी विष्णुशक्तिरवस्थानं करोति वै॥ इति।

अङ्गमेषा त्रयी विष्णोर्ऋग्-यजुः सामसंज्ञिता।

विष्णुशक्तिरवस्थानं सदादित्ये करोति सा॥" इति। [17]

परमादित्यचेतनायाः स्वरूपं विष्णावुपचरितमिति।वर्षचक्रस्य नियन्ता सूर्यः।पुनः माध्यन्दिन-सूर्यस्य अधिदैवतरूपमेव विष्णुः। अतः स चक्रपाणि इति संज्ञया अभिहितः।विष्णोः हस्तधृतस्य आयुधस्य गूढार्थमस्ति।पूर्वं मया विषयोऽयं संक्षेपेणालोचितः।समयचक्रस्य प्रतीकमेव सुदर्शनचक्रम्।गरुडपुराणस्य पूर्वखण्डे सुदर्शनपूजाप्रसङ्गे आयुधपुरुषस्य भावना उपासकानां हृत्पद्मे समुल्लसति इति।पुराणकथकस्य भावनायां विधृतमेतत्-

" नमः सुदर्शनायैव सहस्रादित्यवर्चसे।

ज्वालामाला प्रदीप्ताय सहस्रराय चक्षुषे॥ इति।[18]

विष्णोः आयुधरूपस्य चक्रस्योपरि पुरुषत्वमर्पितमिति।आयुधपदेन सह पुरुषपदस्य संयोगः विष्णोः anthropomorphic इति रूपस्य द्योतकः।मन्त्रब्राह्मणात्मके वेदे पुरुषेण सह विष्णुः एकात्मीभूतोऽभवत्। शतपथब्राह्मणस्य प्रथमाध्यायस्य द्वितीयब्राह्मणे उक्तं ' विष्णुस्त्वा क्रमतामिति यज्ञो वै विष्णुः...।" [19] पुनः तृतीयाध्यायस्य द्वितीयब्राह्मणे उक्तं-" पुरुषो वै यज्ञः।पुरुषस्तेन यज्ञो यदेनं ... तस्मात् पुरुषो यज्ञः।" [20] प्रसङ्गेऽस्मिन् ऋग्वेदीयपुरुषसूक्तं स्मर्तव्यम्।तत्र नारायणऋषिणा सहस्राक्षः सहस्रपाद्वत्वः पुरुष एव स्तुतः। अद्यापि अस्माकं गृहे विष्णुपूजायां अस्य पुरुषसूक्तस्थस्य मन्त्रस्य विनियोगः मुहुरनुश्रवते।अर्थात् श्रुतिप्रमाणेभ्यः जायते परमचैतन्यस्वरूपः पुरुष एव विष्णुः। भावोऽयं विष्णुपुराणेपि विधृतोऽस्ति। पुराणकारेण कथ्यते-

" पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते।

चित्





यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा॥" इति।[21]

अतः शास्त्रप्रमाणेभ्यो जायते माध्यन्दिन-आदित्यस्वरूपस्य परमपुरुषस्य विष्णोः आराधना जनेषु प्रचलिता आसीत् ।अस्य विष्णोः हस्तधृतचक्रं पुरुषरूपेण गुप्तमुद्रासु उत्कीर्णोऽभवत्।यस्मात् आयुधपुरुषस्य उपासना तदा प्रचलिता आसीदित्यनुमीयते।

## चक्रविक्रमपदमधिकृत्य विबुधानां मतवैचित्र्यम्

द्वितीयचन्द्रगुप्तस्य चक्रविक्रममुद्रासु चक्रस्य सम्मुखे दण्डायमानस्य दीर्घावयववृत्तस्य पुरुषस्य मूर्तिः अस्मान् प्रतिभाति।मुद्रायाः पृष्ठभागे स्थितस्य चक्रविक्रममिति पदस्य व्याख्यायां शत्रुघ्नशरणशिंमहाभागेनोक्तं चक्रवत् विक्रम इति।[?]शिवराममूर्तिर्मन्यते नृपः चक्रपुरुषात् वीर्यं लाभाय उद्योगी अभवत्।इयं भावना मुद्रास्वपि प्रतिफलिता भवति।अनया भावनया सह आल्टेकरमहोदयेन प्रदत्तायाः चक्रविक्रमपदस्य व्युत्पत्त्याः सादृश्यमस्ति।तस्मतेन नाममुद्राक्षरस्य निर्वचनं चक्रात् प्राप्तः विक्रम येन सोऽनेन प्रकारेण भवितुमर्हतीति।[22]

गुप्तयुगे न केवलं मुद्रासु स्थापत्यकलास्वपि चक्रपुरुषस्य मूर्तिं उत्कीर्णा अभवत्।कालिदासस्य रघुवंशे चक्रपुरुषस्य वामनाकृतियुक्तस्य स्वरूपस्य वर्णना प्राप्यते।महाकवेः लेखन्यां विधृतमेतत्-

" सुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः।

जलजासिगदाशङ्खचक्रकलाञ्छितमूर्तिभिः॥" इति।[24]

## स्थापत्यकलासु चक्रपुरुषः

शि.शिवराममूर्तिमहाभागः तस्य '*The Weapon of Visṇu*' *इत्यस्मिन्* प्रबन्धे चक्रपुरुषस्य प्राप्तानां मूर्तीनां विषये आलोचितवान्।तस्मतेन राजगिर्- महाबलीपुरम्- बादामी चेति प्रदेशेसु वामनाकृतिविशिष्टस्य आयुधपुरुषस्य निदर्शनं प्राप्तम्।[25] ( चित्रम्-2)

चित्



( चित्रम्-2)

( Sivaramamurti,C." Ayudhapurusa ." the Weapon of Viṣṇu" Artibus Asiae, Vol. 18 No.2, pp.128-136,1955 ,www.jstore.org/stable/3248789

शिवराममूर्तिमहाभागस्य मतानुसारं कुषाणयुगे विष्णोः हस्ते आयुधानाम् प्रतिनिधित्वं तत्र न कोऽपि विशेषत्वमस्ति।गुप्तयुगे विष्णुमूर्तौ अस्य प्रतिफलनं दृश्यते।26( चित्रम्-3)

चित्







(चित्रम्-3)

Sivaramamurti.C ." Viṣṇu." the Weapon of Viṣṇu" *Artibus Asiae*, Vol. 18, No.2. pp.128-136,1955 ,www.jstore.org/stable/3248789

आलोचितायाः मूर्तिरियं कुषाणोत्तरकालस्य गुप्तपूर्वकालस्य वा मथुराप्रदेशात् प्राप्ता विष्णुमूर्तिः। मूर्तिरियं आयुधयुक्ता एव।

देओघरप्रदेशस्य उदयगिरिगुहायां शेषशायिनः स्थापत्यकलापंक्तौ चक्रस्य विपरीते सुदर्शनपुरुषस्य मूर्तिः उत्कीर्णा अस्तीति वयं जानीमः।।बहुषुदेशेऽपि स्थापत्यकलायां चक्रपुरुषस्य मूर्तिः लभ्यते। अधुना कलिकाताविश्वविद्यालयस्य आशुतोषसंग्रहालये रक्षिते दक्षिणचब्बिशपरगणायाः शरिषादहात् प्राप्ते विष्णुचक्रे आयुधपुरुषस्य उपस्थितिः दृश्यते।

## विष्णोरायुधविषये शास्त्रविचारः

चक्रपुरुषस्य आलोचनाप्रसङ्गे पाञ्चरात्रागमे अहिर्बुध्न्यसंहितायां विधृतं सुदर्शनचक्रविषयकं सिद्धान्तं तात्पर्यपूर्णमिति मन्ये।अहिर्बुध्न्यसंहिता पाञ्चरात्रसम्प्रदायस्य गुरुत्वपूर्णं शास्त्रतया परिगण्यते।गुप्तयुगे अस्य ग्रन्थस्य संकलनमभवदित्यनुमीयते।अस्यां संहितायां चक्रपुरुषस्य वर्णना समुपलभ्यते।आगमेऽस्मिन् वर्णितमेतत्-

" चक्रस्वरूपीभगवांस्तानि धत्ते स्वरूपतः॥" इति 27

चित्

अहिर्बुध्न्यसंहितानुसारं दिव्यास्त्रेष्वनेकेषु प्रभावो सुदर्शनचक्रस्य वर्णनायां वर्णितमस्ति। यथा

सुदर्शनाय विद्महे भर्गोदेवस्य धीमहि।[20]

यदि शास्त्रगतीनां व्याख्यानुसारेण चक्रस्य पुरुषं रूपः सदा ध्यायेदिति भागवतधर्मस्य पाञ्चरात्रागमेष्वहिर्बुध्न्यसंहितायां सुदर्शनचक्रस्य माहात्म्यमुद्दिश्य चक्रस्य नवैकशाक्त्यादिविवरणम् विद्यते तस्य प्राचीनभारतीयसमाजे अतीव प्रसिद्धिः। [illegible] विजयं विष्णुना नृपेण तु चक्रपुरुषं पूजितव्यमिति संशयो नास्ति। [illegible] द्वितीयचन्द्रगुप्तस्य चक्रविक्रममुद्रायां ऐतिहासिकतात्पर्यमनेन [illegible]।

चक्रपुरुषस्य मूर्तिसम्बन्धिनी व्याख्या।

अत्र चक्रविक्रममुद्राणां विषये अपरमेकं तथ्यमनुसन्धानेन नृपस्यास्य यथा मुद्रासु दृश्यते चक्रपुरुषस्य सम्मुखे स्थितः नृपः तस्य हस्तात् किञ्चिद्वस्तुं अञ्जलिबद्धरूपेण गृह्णातीति। चक्रपुरुषस्य प्रसादं [illegible] निर्णयमिदं [illegible] पण्डिताः [illegible] चक्रवर्ती [illegible] पितृग्राः मन्यन्ते यत् पराक्रमस्य प्रतीकम्। प्राचीनभारते शास्त्रग्रन्थेषु यत्र राजधर्मविषयकं तथ्यं समुल्लिखितमस्ति तत्र वर्णितमेतत् [illegible] विस्तारे एतस्य विविधरूपस्य पुरुषं प्राचीनशास्त्रकारैः [illegible] प्रभु-मन्त्र-उत्साहयुक्तः त्रिविधशक्तयः नाना-क्रियाशक्ति [illegible] चक्रपुरुषस्य भावनायां सन्निहितमस्ति।[22] एफ्.ओ.श्रेडरमहाभागः तस्य ' *Introduction to the Pāñcarātra and Ahirbudhnya Saṃhitā* इत्यस्मिन् ग्रन्थे उक्तवान्- " The KriyāŚakti is th Sudarśana portion of Lakṣmī; for it is identical with Viṣṇu's wi l to be symbolised by the sudarsana or discuss."[23]

विष्णुधर्मोत्तरपुराणे चक्रं पवनस्य प्रतीकतया वर्णितम्। यदि विष्णुः [illegible] तर्हि तस्य हस्तस्थितं चक्रं जीवानां पवनतुल्यगतिं प्राणवायुः इति मन्ये। पाञ्चरात्रागमे वर्णितमेतत् विष्णोः क्रियाशक्तिः लक्ष्मी। [illegible] विष्णोः [illegible] लक्ष्मीर्विष्णोः [illegible] निदर्शनं चक्ररूपप्रतीकेन अभिव्यक्तमस्ति

एइच्.सि.त्रिवेदिमहाभागः विश्लेषणेन [illegible] व्याख्यातवान् [illegible] चक्रपुरुषस्य तात्पर्यं भागवतस्य धारणायां [illegible] चक्रपुरुषरूपेण प्रकटितम्।[31]

उपसंहृतिः

मित्





द्वितीयचन्द्रगुप्तस्य चक्रविक्रममुद्रायां चक्रवर्तीनृपस्य भावना सन्निहितमस्ति।गुप्तशिल्पकलायां चक्रपुरुषस्य उपस्थापनं राजनैतिकोद्देश्यप्रसूतम्।राज्ञः सार्वभौमक्षमतायाः प्रतीकोऽयं चक्रपुरुषः।

भागवतधर्मस्य विवर्तनधारायां विष्णोः anthropomorphic इत्यस्य रूपस्य प्रतिनिधिरूपेण आयुधपुरुषस्य मुद्रायां तक्षणं धर्मस्यास्य विस्तारे सहायकं भवति।चक्रपुरुषस्य धारणायाः एतत् प्रमाणितं जायते धर्मचर्चायां मूर्तितत्त्वगतकलायाश्च संकेतविद्यायाः विशेषतात्पर्यमस्ति।अतो जायते भागवतधर्मस्य इतिहासानुसन्धाने गुप्तयुगस्य एतासां मुद्राणां गुरुत्वं लक्षितम्। पुनः विष्णोः मूर्तिविषयकगवेषणायां द्वितीयचन्द्रगुप्तस्य चक्रविक्रममुद्राणां विशेषतात्पर्यमस्ति।

-----------------------

उल्लेखपञ्जिः


1. रमेशचन्द्र मजुमदार, *भारत इतिहासेर आदिपर्व*, पृ.329.
2. तदेव, पृ.330.
3. शचीन्द्रनाथ मुखोपाध्याय , *Art in Gupta and Post Gupta Coinage*, पृ.16
4. भास्कर चट्टोपाध्यायः. *Coins and Icons* , पृ.260.
5. डि.सि.सरकार, *Select Inscriptions. Vol.I.* पृ.262.
6. नगेन्द्रनाथ वसुमहोदयेन सम्पादितम्, *विश्वकोषः*, पञ्चदशखण्डः, पृ.313.
7. ए.एस्.अल्तेकर, *The Gupta Gold Coins in the Bayana Hoard,* पृ.182.
8. प्रशान्त श्रीवास्तवमहाभागेन सम्पादितम्.*Encyclopaedia of Indian Coins*.Vol.I 96.
9. जितेन्द्रनाथ बन्द्योपाध्याय , *The Development of Hindu Iconography,* पृ.71.
10. ए.एस्.अल्तेकर, पूर्वोक्त, पृ.182.
11. स्वाती चक्रवर्ती, *Ancient Indian Coins,*पृ.101.
12. एस्.एस्.रॉय, *Early Coins of North India*, पृ.170.
13. तदेव, पृ. 172.
14. स्वाती चक्रवर्ती, पूर्वोक्त, पृ.84
15. *विष्णुधर्मोत्तरपुराणम्,तृतीयखण्डः. 85/16-18.*
16. श्रीराम रामानुज, *Hindu Iconology the study of symbolism and meanings of icons*, पृ.16.
17. *विष्णुपुराणम्*, द्वितीयांशः, *12/7-8,11.*
18. *गरुडपुराणम्*. पूर्वखण्डः,33/8.
19. *अहिर्बुध्न्यसंहिता*,1/2/15.


मित्

20. तत्रैव,3/21.

21. *विष्णुपुराणम्,2/3/12.*

22. एस्.एस्.पि. कुर्सेयु, पृ.171

23. हि.वि.त्रिवेदि, *JNSI, Vol.XIII Part.II,* पृ.181.

24. *वृहत्संहितायां...*, *पृष्ठसंख्या 1080*

25. सि.शिवराममूर्ति, पृ.120.

26. सि.शिवराममूर्ति, The Weapon of Visnu, पृ.134.

27. *अहिर्बुध्न्यसंहिता 40/7.*

28. *तत्रैव 25/1*

29. एस्.एस्.पि. कुर्सेयु, पृ.171

30. एफ्.ओटो.श्रेडर, *Introduction to the pāñcarātra and Ahirbudhnya Saṃhitā*

31. एच्.वि.त्रिवेदी, JNSI Vol.XVII 1955 Part.II, पृ.10

विमर्शग्रन्थाः


Achan,RamaRamanuja. *Hindu Iconology*,Simha Publications 2015.www.australiancouncilofhinduclergy.com.pdf

*Ahirbudhnya Saṃhitā of the Pāñcarātrāgama*.Ed. M.D.Ramanujacharya Madras. The Adyar Library and Research Centre, 2nd ed.1986

Altekar, A.S. *The Gupta Gold Coins in the Bayana Hoard*. Numismatic Society of India, 1954.

Banerjee, Jitendra Nath. *The Development of Hindu Iconography*. Munshiram Manoharlal Pvt.Ltd. 2016 .

"Bhagavati". *Viśvakoṣa*. Vol.XIII. Visvakosha samgrahalaya 1349(B.Y.) p.312.

Chakraborty, Benoy. *Bhārat Bhāser Abhyudaya*. Orient Blackswan Pvt Ltd. 2011

Chakraborty, Swati. *Socio-Religious & Cultural Study of Ancient Indian Coins*. B.R.Publications,2013.

Chattopadhyaya, Bhaskar.*Coins and Icons : A study of Myths and symbols in Indian Numismatic Art*. Punthi Pustak, 1977

*Garuḍa Purāṇa*. Ed.with Beng.Trans. Pancanana Tarkaratna.Kalikata. published by Natavara Chakraborty, 1336 B.Y. ( 2nd ed.)

Mukherjee, B.N. *Art in Gupta and Post-Gupta Coinages of Northern India*. State Museum. 1985


विन्






*Padmapurāṇam*.PatalaKhanda.Ed.with Beng.Trans. Pancanana Tarkaratna. published by Natavara Chakraborty, 1318B.Y.( 2nd ed.)

*Raghuvaṃśam*. Ed.with Beng.Trans. Asok Kumar Bandyopadhyaya. Kolkata: Sanskrit Pustak Bhandar,1411 (B.Y.)

Rao,T.A.G. *Element of Hindu Iconography* Vol I, Indological Book House,1971

*ŚatapathaBrāhmaṇa*. prathamabhaga.Ed.with Beng.Trans. Shanti Banerjee. Ramkrishna Mission Institute of Culture.1423 (B.Y.)

Schrader, F.Otto.*Introduction to the Pāñcarātra and Ahirbudhnya Saṃhitā*. Adyar Library 1916.

Singh, S.B. *Early Coins of North India an Iconographic Study*. Janaki Prakashan.1984

Sircar, Dines Chandra. *Select Inscriptions Bearing on Indian History and Civilization* (Vol.I). University of Calcutta, 1965.

Sivaramamurti, C." the Weapon of Visnu" *Artibus Asiae*, Vol. 18, No.2, 1955, pp.128-135, www.jstore.org/stable/3248789 Accessed 28th May, 2019.

Sivaramamurti, C."Cakravikrama type". *JNSI* Vol.XIII, Part.II. pp.180-182.

Srivastava, Prashant. "Chakravikrama type".*Encyclopaedia of Indian Coins (Ancient Coins of Northern India up to Circa 350 AD)*. Agam Kala Prakashan.2012. p. 96.

Trivedi, H.V." *The Cakravikrama coin of Chandragupta II*". *JNSI*. Vol.XV Part I. 1955, pp.100-106.

*Viṣṇudharmottarapurāṇa*.Third Khanda. Ed. With Eng. Trans.Priyabala Shah. Parimal Publication 2002.


विन्

## "वाक्यपदीयस्य साधनसमुद्देशदिशा कर्मत्वविमृष्टिः"

सौम्यजित्-सेनः
सहायकाध्यापकः, संस्कृतविभागस्य
कोचविहार-पञ्चानन-वर्मा-विश्वविद्यालयस्य
जङ्गमदूरवाणीसंख्या – 9475904168
ईमेल - soumyajit.sanskrit@gmail.com

♣ प्रबन्धविषयसंक्षेपः

वाक्यपदीयस्य तृतीये प्रकीर्णसंज्ञके काण्डे पदविषयकाणि विविधगुरुत्वपूर्णानि तत्त्वानि समालोचितानि। तत्र 'साधनसमुद्देशः' इत्यभिधेयेऽध्याये कर्मादिकारकाणि भर्तृहरिणा विस्तरशो विवेचितानि। तेन कारकाणामालोचना द्वितीयादिविभक्त्यनुसारं प्रारब्धा। परं पाणिनिनिर्दिष्टस्तु अपादानादिक्रमो नैवानुसृतो ग्रन्थकृता।

वाक्यपदीये भर्तृहरिणा साधनविवक्षायां स्वमतं प्रकाशितं यत् सामर्थ्यमेव साधनमिति। क्रियाया व्यापाररूपायाः फलरूपाया वा सिद्धौ द्रव्यस्य कर्तृत्व-कर्मत्व-प्रभृतिका शक्तिः साधनमिति साध्यतेऽनया क्रियेति व्युत्पत्त्या भाष्यकारप्रभृतयो विदुः।

शक्तिः सामर्थ्यं वा साधनमिति सामान्यतयोच्यते। अस्य कुतः सप्त भेदाः। प्रथमतः षट्प्रकाराः कर्मादिसंज्ञाभाजः। सप्तमप्रकारश्च शेषसंज्ञकः। आचार्येण भर्तृहरिणा कारकेषु प्रथममेव कर्मकारकस्य समालोचना विहिता। इत्येतं तु अवश्यमेवानुसन्धेयं यच्चैतत्साधिकदिशा कर्मलक्षणविषयकं तत्त्वं वैयाकरणदृष्टिकोणतः पृथग्भावेन पर्यालोचितमिति वैशिष्ट्यमाधत्ते।

♣ प्रधानपदनिचयाः

कर्मत्वम्, साधनम्, वाक्यपदीयम्, साधनसमुद्देशः, भर्तृहरिः च।

## "वाक्यपदीयस्य साधनसमुद्देशदिशा कर्मत्वविमृष्टिः"

### १.१. उपोद्घातः

व्याक्रियन्ते विविच्यन्ते प्रकृतिप्रत्यया यत्र तदिति व्युत्पत्त्या व्याकरणमेव शब्दशास्त्रम्। पदशास्त्रमित्यस्य नामान्तरम्। व्याकरणे हि पदानां तदवयवभूतानां सूक्ष्मातिसूक्ष्मं विवेचनं साधु प्रस्तूयते। प्रकृतिप्रत्यययोः पदपदार्थयोः वाक्यवाक्यार्थयोः सम्यक् विश्लेषणं व्याकरणस्य प्रयोजनत्वेन स्वीक्रियते। अतः शब्दानुशासनमेव व्याकरणस्य मुख्यं प्रयोजनमित्यत्र नास्ति संशीतिः काचित्।

पुरा व्याकरणम् अष्टभेदं प्रचलितमासीदिति तदीयं महत्त्वं सर्वत्र प्रकाशितम्। तथाहि हैमबृहद्वृत्त्यवचूर्णौ –





'ब्राह्ममैशानमैन्द्रं च प्राजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टमम्॥"[1] इति।

पाणिनिना स्वीयाष्टाध्याय्यां गार्ग्य-शाकटायन-स्फोटायनादीनां प्रायः दशाचार्याणां कृतः समुल्लेखः परन्तु तत्परवर्तिषु वैयाकरणेषु कात्यायन-पतञ्जलि-वामन-भर्तृहरि-कैयट-भट्टोजिदीक्षित-नागेश-वरदराजादीनां प्रामुख्यं भजन्तां वैयाकरणानां व्याकरणविषये विशिष्टं योगदानं वाच्यमेतन्। व्याकरणसाहित्येतिहासाकाशे दार्शनिकचिन्ताधारायाः सुदीर्घो मार्गः प्रशस्तीकृतो यैः खलु विशिष्टैः व्याडि-पतञ्जलि-नागेश-प्रमुखैः वैयाकरणवर्यैः, तेष्वन्यतमस्तावत् वैयाकरणमूर्धन्यो महर्षिः भर्तृहरिः तदीयं 'वाक्यपदीयम्' इति ग्रन्थरत्नं तस्या एव दार्शनिकचिन्ताधारायाः साक्ष्यमावहति।

### १.२. साधनसमुद्देशे साधनम्

वाक्यपदीयस्य तृतीये प्रकीर्णसंज्ञके काण्डे पदविषयकाणि विविधगुरुत्वपूर्णानि तत्त्वानि समालोचितानि। तत्र 'साधनसमुद्देशः' इत्यभिधेयेऽध्याये कर्मादिकारकाणि भर्तृहरिणा विस्तरशो विवेचितानि। तेन कारकाणामालोचना द्वितीयादिविभक्त्यनुसारं प्रारब्धा। परं पाणिनिनिर्दिष्टस्तु अपादानादिक्रमो नैवानुसृतो ग्रन्थकृता। वैयाकरणसिद्धान्तकौमुद्यामपि कर्तृकारकेणैव कारकालोचना समारब्धा भट्टोजिदीक्षितेन। अत्र किं नाम कारणमिति विषये टीकाकृद्भिरुच्यते –

'कारकविशेषनिर्देशश्च विभक्त्यनुक्रमानुसारेणैव प्रदर्शितः। सूत्रेषु तु विप्रतिषेधपरिभाषामनुरुध्य अपादानादिक्रमेण उक्तम्। तत्र विभक्तयः स्वौजसादयः। कारकमभिहितमनभिहितञ्च भवति। तत्र प्रथमाभिहित-कारकविभक्तिः प्रातिपदिकमात्र एव विधीयते। द्वितीयादयश्च सर्वा अनभिहिते कारकविशेषत्वे इत्येकप्रकारत्वाद् द्वितीयाद्यर्थानुसारेणैव उपक्रान्तं। द्वितीयाद्यर्थश्च कर्मादिः। यदुक्तं कर्मणि द्वितीयेत्यादि। अतः कर्मण एवादौ व्याख्या अवसरप्राप्ता।"[2] इति।

शाब्दिकनयानुसारेण 'क्रियानिष्पादकत्वं कारकत्वम्' इति। यदेव क्रियोत्पत्तौ कारणं तदेव कारकम्। महाभाष्येऽपि भाषितं –

'कारकमिति महती संज्ञा क्रियते... तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनं अन्वर्थसंज्ञा विज्ञायेत – करोतीति कारकम्।' इति।

वाक्यपदीये भर्तृहरिणा साधनविवक्षायां स्वमतं प्रकाशितं यत् सामर्थ्यमेव साधनमिति। क्रियाया व्यापाररूपायाः फलरूपाया वा सिद्धौ द्रव्यस्य कर्तृत्व-कर्मत्व-प्रभृतिका शक्तिः साधनमिति साध्यतेऽनया क्रियेति व्युत्पत्त्या भाष्यकारप्रभृतयो विदुः। शक्तिरेव तदाधारपारतन्त्र्येणाप्रधानत्वाद् गुणशब्देनोक्ता यद्वा अन्यसमवायित्वात् उपकारस्य भेदकत्वरूपाद् विशेषणरूपात्मनाः सम्बन्धाद् गुणशब्देन सा च॥ किञ्च, शक्तमेव द्रव्यं साधनं भवति, न त्वशक्तम्। न च निराश्रया शक्तिः सम्भवतीति शक्त्याश्रिताः शक्तिद्वारेव द्रव्यस्य साधनत्वम्, न तु साक्षात्। 'परोक्षे लिट्' (*अष्टाध्यायी*, ३/२/११५) इति सूत्रेऽपि यद् भाष्यम् –

[1] *वैयाकरणसिद्धान्तकौमुदी*, *अजन्तपुंल्लिङ्गप्रकरणम्*, (अशोककुमारपण्डा), पृ. ९९.

[2] *वाक्यपदीये साधनसमुद्देशः* (मृणालकान्ति-गङ्गोपाध्याय-प्रणीतो ग्रन्थः), पृ. ४३.

"यदि गुणसमुदायः साधनम्, साधनमप्यनुमानगम्यम्। अथान्यद् गुणेभ्यः साधनम्, भवति प्रत्यक्षपरोक्षतायाः सम्भवः।"[3] इति, –

तदपि शक्तेः क्रियां प्रति साक्षात् साधनत्वम्, द्रव्यस्य तु शक्तिद्वारैव इत्येवमेव नेतव्यम्, शक्तेः सदा परोक्षत्वात्। तथाहि साधनसंज्ञां प्रयच्छता भर्तृहरिणा निगदितं –

"स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।

क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः॥"[4] इति।

कथं तत्पुनः समवगम्यते शक्तिः साधनं न पुनर्द्रव्यमित्याकाङ्क्षायामाह भर्तृहरिः –

"शक्तिमात्रासमूहस्य विश्वस्यानेकधर्म्मणः।

सर्वदा सर्वथा भावात् क्वचित् किञ्चिद् विवक्ष्यते॥"[5] इति।

अत्र घटादयः कार्यरूपा अर्थक्रिया समर्थभावा विश्वशब्दवाच्याः। अत एव प्रत्येकं ताः शक्तयस्तत्र समूहे मात्रा भागा इति शक्तिसमाहारमात्रं घटादयः। ताश्च शक्तयोऽनेकरूपाः। काश्चित् स्वहेतोरेव प्रभवन्ति, न तु स्वाश्रयहेतोः। स्वाश्रयविनाशकसामग्रीत एवाश्रयविनाशमन्वपि च विनश्यन्ति। तथा बोधप्रदीपादीनां प्रकाशशक्तयः। एता अपि मन्दत्वामन्दत्वाभ्यां तरतमभावेन चानेकरूपाः। शक्तेरस्तित्वे सम्भाविते सत्येव कर्तृकर्मादीनां साधनत्वं सूपपन्नं भवति। परमसति पुनः कथं तासां शक्तीनां विवक्षा ? 'स्थाल्यां पचति, स्थाल्या पचति' इति सम्भावनधारणोपकारा स्थाली करणाधिकरणभिन्ना कथमित्याशङ्कायामाह भर्तृहरिणा –

"साधनव्यवहारश्च बुद्ध्यवस्थानिबन्धनः।

सन्नसन् वार्थरूपेषु भेदो बुद्ध्या प्रकल्प्यते॥"[6] इति।

अतः शब्दव्यवहारो वक्तुरनुभवं विवक्षाञ्च निर्भरीकरोति। अर्थनिरूपणे बुद्धिरेव साधनम्। साधनव्यवहारश्च वक्तुर्विवक्षाधीनत्वाद् एक एव पदार्थो विभिन्नकारकत्वेनोपस्थीयते। वाक्यपदीय-टीकाकृता हेलाराजेन तस्मादेवोदाहरणत्वेनागादि –

"एवं तनुतरकपालत्वात् स्थाली पाके अनपेक्षितकर्तृवियोगात् स्वातन्त्र्येण विवक्ष्यत इति कर्त्री, इन्धनोपकारानपेक्षया तस्या एव साधकतमत्वविवक्षायां तु करणं, वास्तवाधारविवक्षायां तु अधिकरणत्वमिति सर्वमुपपद्यते।"[7] इति।

इत्थमेव भर्तृहरिणात्र साधनस्य विस्तरशो व्याख्यानं परिवेशितम्।

---

[3] *सटीके वाक्यपदीये साधनसमुद्देशः*, पृ. ९८.

[4] *वाक्यपदीयम्, साधनसमुद्देशः*, कारिका – १.

[5] तत्रैव, कारिका – २.

[6] तत्रैव, कारिका – ३.

[7] तत्रैव, कारिका – ३ (हेलाराज-टीका).





१.३. साधनभेदाः

शक्तिः सामर्थ्यं वा साधनमिति सामान्यतयोच्यते। अस्य पुनः सप्त भेदाः। प्रथमतः षट्प्रकाराः कर्मादिसंज्ञाभाजः। सप्तमप्रकारश्च शेषसंज्ञकः। तथाह्युच्यते वाक्यपदीये –

"सामान्यं कारकं तस्य सप्ताद्या भेदयोनयः।

षट् कर्माख्यादिभेदेन शेषभेदस्तु सप्तमी॥"[8] इति।

१.३.१. कर्मत्वविमृष्टिः

आचार्येण भर्तृहरिणा कारकेष्वादावेव कर्मकारकस्य समालोचना विहिता। कर्मलक्षणविषये काचिदपि कारिका तेन नैव समुल्लिखिता। परं पाणिनिना तु कर्मलक्षणं लक्षितं – 'कर्तुरीप्सिततमं कर्म' (*अष्टाध्यायी*, १/४/४९) इति। सूत्रस्यास्य वृत्तावुच्यते भट्टोजिदीक्षितेन – 'कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्।'[9] इति। कर्मकारकनिरूपणावसरे नागेशेन निगदितं –

'कर्मत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्।'[10] इति।

इदमेव 'कर्तुरीप्सिततमं कर्म' इति पाणिनिकृतसूत्रे ईप्सिततमत्वम्। 'गां दोग्धि पयः' इत्यादौ पयोवृत्तिः यो विभागः तदनुकूलो व्यापारो गोवृत्तिः। तदनुकूलश्च गोपवृत्तिः। अत्र पयसः कर्मत्वसिद्धये प्रयोज्यत्वनिवेशः, जन्यत्वनिवेशे तु तन्न स्यात्। 'प्रयागात्काशीं गच्छति' इत्यत्र च प्रयागस्य कर्मत्ववारणाय प्रकृतधात्वर्थफलेति पदं प्रदत्तम्। अपि च, प्रकृतधात्वर्थग्रहणेनैव प्रयागादिशब्दे कर्मत्वस्य वारणाद् उद्देश्यत्वपदनिवेशो व्यर्थ इति चेन्न, तथा सति 'काशीं गच्छन् पथि मृतः' इत्यादौ काश्या धात्वर्थभूतसंयोगफलाश्रयत्वाभावेन कर्मत्वं न स्यात्। अतः सप्रयोजनमिदमुद्देश्यपदम्।

उपर्युक्तलक्षणे द्वेष्ये तथा चोदासीनकर्मणि कर्मलक्षणस्याव्याप्तेः पाणिनिना सूत्रितं – 'तथायुक्तं चानीप्सितम्' (*अष्टाध्यायी*, १/४/५०) इति सूत्रम्। नागेशनये 'कर्तुरीप्सिततमं कर्म' (*अष्टाध्यायी*, १/४/४९) इति कर्मलक्षणे ईप्सिततमपदस्य स्वार्थविशिष्टयोग्यताविशेषे लक्षणा बोध्या। तथा च कर्मणः पर्यवसितं लक्षणं तावन्नागेशदिशा –

'प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वयोग्यताविशेष-शालित्वं कर्मत्वम्।'[11] इति।

एतेन कार्यान्तरं कुर्वति चैत्रे 'किं ग्रामं गच्छति अथवा ओदनं पचति' इति प्रश्ने 'न ग्रामं गच्छति न ओदनं पचति' इत्यादिप्रयोगा व्याख्याताः। यत्र तु ताडनादिना पराधीनतया विषभोजनादिकं तत्र विषादिः तादृशफलाश्रयत्वेनोद्देश्यमेव। अत एव 'आतश्च विषमीप्सितं तद् भक्षयति ताडनात्' इति भाष्यं

---

[8] *वाक्यपदीये साधनसमुद्देश* (मृणालकान्ति-गङ्गोपाध्याय- प्रणीतः), पृ. ८९.

[9] *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा-तत्त्वबोधिनीसहिता), प्रथमो भागः, पृ. ५९८.

[10] *परमलघुमञ्जूषा*, कारकनिरूपणम्।

[11] तदेव।

मङ्गच्छते। एवञ्च महर्षिणा पाणिनिना दुहादीनां प्रयोगे अपादानादीनां कर्मत्वसिद्धये 'अकथितञ्च' (*अष्टाध्यायी*, १/४/५१) इति सूत्रं पठितम्। कौण्डभट्टाचार्येण तु वैयाकरणभूषणसारे सुबन्तनिर्णयावसरे तल्लक्षणं लक्षितं – 'क्रियाजन्यफलाश्रयत्वं कर्मत्वम्'[12] इति।

### १.४. साधनसमुद्देशे कर्मभेदाः

भर्तृहरिणा तदीये साधनसमुद्देशे प्राधान्येन द्वितीयाविभक्त्यर्थकस्य कर्मण ईप्सितानीप्सितभेदेन भेदद्वयं स्वीकृतम्। तयोर्मध्ये पुनः ईप्सितकर्मणो भेदत्रयं स्वीक्रियते निर्वर्त्यकर्म-विकार्यकर्म-प्राप्यकर्मभेदात्, अनीप्सितकर्मणश्च भेदचतुष्टयं तेन समुपवर्णितम् उदासीनकर्म-अनीप्सितकर्म-संज्ञान्तरैरनाख्यातकर्म-अन्यपूर्वककर्म-भेदतः। तथाहि भर्तृहरिभारती –

"निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।
तत्रेप्सिततमं कर्म चतुर्धान्यत् तु कल्पितम्।।"[13] इति।
"औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद् यच्चाप्यन्यपूर्वकम्।।"[14] इति।

### १.४.१. निर्वर्त्यकर्म

ईप्सितकर्मणः भेदत्रितयमध्ये प्रथमं तावन्निर्वर्त्यं कर्म। अस्य लक्षणं लक्षितं हरिणा –

"सती वाविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।।"[15] इति।

केषाञ्चिद् उत्पद्यमानवस्तूनां प्रकृतिरुपादानं वास्ति। यथा घटस्योपादानं मृत्तिका, कुण्डलस्य च सुवर्णम्। केषाञ्चित्पुनरेवमुपादानं नैव भवति। यथा संयोगादीनाम्। कस्यचिद्वस्तुनः परिणामत्वेन प्रकृतेश्च परिणामिरूपेण उल्लेखं न विधाय तयोर्मध्ये भिन्नत्वमेव यदि निर्दिश्यते तदा भवति निर्वर्त्यं कर्म। तथाहि तल्लक्षणं लक्षयता कैयटेनागादि – 'यस्योपादानकारणं नास्ति तन्निर्वर्त्यम्।' इति। अत्रेदमवधेयं यद् लक्षणमेतद् वैशेषिकसिद्धान्तानुसारं विहितम्। आचार्यभर्तृहरिणा प्रसङ्गेऽस्मिन् प्रोक्तं –

"यदसज्जायते सद्वा जन्मना यत्प्रकाश्यते।
तन्निर्वर्त्यं विकार्यञ्च कर्म द्वेधा व्यवस्थितम्।।"[16] इति।

### १.४.२. विकार्यकर्म

विकार्यकर्मलक्षणं लक्षयता भर्तृहरिणोक्तं यत् –

12 *वैयाकरणभूषणसारः*, सुबन्त-निर्णयः।

13 *वाक्यपदीये साधनसमुद्देश* (मृणालकान्ति-गङ्गोपाध्याय- प्रणीतः), पृ. ४५.

14 तत्रैव, पृ. ४६.

15 तत्रैव, पृ. ४९.

16 तत्रैव, पृ. ५०.





"प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्।
किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।।"[17] इति।

तथाहि विकार्यकर्मणो भेदद्वयं निर्दिष्टं ग्रन्थकृता प्रकृत्युच्छेदसम्भूतकर्म गुणान्तरोत्पत्तिमूलकं कर्म चेति। यत्र प्रकृतेः कारणस्य वा विनाशान्तरं कर्मणोत्पत्तिर्जायते तत्प्रकृत्युच्छेदसम्भूतकर्म। यथा – 'काष्ठं भस्म करोति' इति। अत्र हेलाराजेन निगदितं –

"काष्ठानि भस्म करोति, पूर्ववत् प्रकृतिविकारयोः क्रियासम्बन्ध उपयोज्यः, पूर्वेण तु लक्षणेन निर्वर्त्यमेतत् कर्म प्रकृतेऽविवक्षायां, विवक्षायान्तु विकार्यम्।"[18] इति।

द्वितीयप्रकारे विकार्यकर्मणि कारणात्कार्ये गुणान्तरोत्पत्तिर्विवक्ष्यते। यथा – 'सुवर्णं कुण्डलं करोति' इति। अत्र सुवर्णं कुण्डलत्वेन परिवर्तते। अतः सुवर्णस्यावयवसंस्थानापेक्षया कुण्डलानामवयवसंस्थाने विलक्षणत्वप्रतिपादनादत्र गुणान्तरोत्पत्तिमूलकं कर्म।

### १.४.३. प्राप्यकर्म

प्रत्यक्षानुमानप्रमाणाभ्यां यत्र कर्मणि किञ्चिदपि क्रियाकृतवैशिष्ट्यं न प्रतीयते तत्रैव भवति प्राप्यकर्म। अस्योदाहरणं यथा – 'ग्रामं गच्छति आदित्यं पश्यति' इति। गमनक्रियाकृतवैशिष्ट्यं ग्रामे दर्शनक्रियाकृतवैशिष्ट्यञ्चादित्ये अदृष्टं भवति। विषयोऽयं स्पष्टीकुर्वता भर्तृहरिणाभ्यधायि –

"क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।"[19] इति।

यद्यपि भर्तृहर्यादिवैयाकरणैरीप्सितकर्मणः भेदत्रयं स्वीक्रियते, तथापि 'व्रीहीन् प्रोक्ष्यति' इति प्रयोगस्य संग्रहादाचार्यमीमांसकैरुक्तकर्मणश्चतुर्धा विभागः कृतः। एतत्तु खण्डदेवस्य भाट्टतन्त्ररहस्ये स्पष्टम्। तदुच्यते – "तच्च कर्म चतुर्विधम् – उत्पाद्यम्, आप्यं, विकार्यं, संस्कार्यञ्चेति। घटं करोति, घटं जानाति, व्रीहीन् अवहन्ति, व्रीहीन् प्रोक्ष्यतीत्युदाहरणानि।"[20] इति।

- ✓ अनीप्सितकर्म

अनीप्सितकर्मविषये पाणिनिना सूत्रितं - 'तथायुक्तं चानीप्सितम्' (*अष्टाध्यायी*, १/४/५०) इति। कर्मणोऽस्य भेदचतुष्टयं भर्तृहरिणा प्रतिपादितमिति तु पूर्वमेवोक्तम्। तानि कर्माणि यथाक्रममधस्तात्प्रस्तूयते –

### १.४.४. उदासीनकर्म

'ग्रामं गच्छन् तृणं स्पृशति' इत्युदाहरणे 'ग्रामं गच्छन्' इत्युक्तादेव तृणरूपस्य औदासीन्यं प्रकटीभवति।

17 तत्रैव, पृ. ५१.

18 *वाक्यपदीयम्, साधनसमुद्देशः*, कारिका – ५७ (हेलाराज-टीका).

19 *वाक्यपदीये साधनसमुद्देश* (मृणालकान्ति-गङ्गोपाध्याय- प्रणीतः), पृ. ५२.

20 *भाट्टतन्त्ररहस्यम्*, पृ. ५५.

१.४.५. अनीप्सितकर्म

'ओदनं भुञ्जानो विषं भुङ्क्ते' इत्युदाहरणे कर्तुरनिच्छायां विषभक्षणं विषस्यानुद्दिश्यता प्रतिपाद्यते। यत्र तु मरणेच्छायां विषभोजनं तत्र तु ईप्सिततमकर्मत्वेन विषस्य ग्रहणं जायते।

१.४.६. संज्ञान्तरैरनाख्यातकर्म

वैयाकरणैः अकथितकर्मत्वेनास्य ग्रहणं क्रियते। अपादानादिविशेषैरविवक्षितकर्म एवाकथितं कर्म। अस्योदाहरणं यथा – 'गां दोग्धि पयः' इत्यत्र स्वभावत एव गोरपादानाविवक्षायां कर्मण एव विवक्षितत्वं 'अकथितञ्च' (*अष्टाध्यायी*, १/४/५१) इति सूत्रेणानेन कर्मसंज्ञा विधीयते।

१.४.७. अन्यपूर्वककर्म

कर्मणो विभागस्यास्य व्याख्यानावसरे वैयाकरणभूषणसारस्य प्रभाटीकायां समुक्तं – 'यत्कर्म शास्त्रान्तरेण संज्ञान्तरबाधकशास्त्रं प्रवृत्तेन तदन्यपूर्वकं कर्म'[२१] इति। अत्रोदाहरणं यथा –

'क्रूरमभिक्रुध्यति' इत्यत्र 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' (*अष्टाध्यायी*, १/४/३७) इति सूत्रेण प्राप्तां सम्प्रदानसंज्ञां प्रबाध्य 'क्रुधद्रुहोरुपसृष्टयोः कर्म' (*अष्टाध्यायी*, १/४/३८) इति सूत्रेण क्रूरस्य कर्मसंज्ञा क्रियते। अत एवेदमन्यपूर्वककर्मण उदाहरणम्।

१.५. उपसंहृतिः

भगवतो भर्तृहरेर्मतमाश्रित्य वैयाकरणदिशा समासेनात्र कर्मत्वविचारः प्रस्तुतः। अत्रेदं तु अवश्यमेवानुसन्धेयं यद्वैयाकरणदिशा कर्मलक्षणविषयकं तत्त्वं वैयाकरणदृष्टिकोणतः पृथग्भावेन पल्लवितमिति वैशिष्ट्यमाधत्ते। नागेशेन तु तदीयायां 'परमलघुमञ्जूषा'यां नैयायिकसम्मितानि चत्वारि कर्मलक्षणानि समाहृतानि। तानि यथा –

- कर्मत्वं करणव्यापारवत्त्वम्।
- करणजन्यव्यापारयुक्तत्वम्।
- क्रियाजन्यफलशालित्वं कर्मत्वम्।
- कर्त्रन्तरसमवेतक्रियाजन्यफलशालित्वं कर्मत्वम्, चेति।

इत्थं व्याकरणादृते कर्मविषयकज्ञानावाप्तेरसम्पूर्णत्वात् कारकज्ञानमपि सम्यक्तया न जायते। अत एव व्याकरणस्य महत्त्वं सर्वातिशायि विराजते। न केवलं भाषाशुद्धिसाधनमेव, अपि तु शब्दब्रह्मबोधकं शब्दब्रह्मावाप्तिसाधनं च वर्तते। तथाहि यो वाक्तत्त्वं सर्वथा पश्यति, वाक्तत्त्वमपि तस्मै स्वीयं रूपं प्रकटयतीत्याम्नातमृग्वेदे –

'उत त्वः पश्यन् न ददर्श वाचम्, उत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे, जायेव पत्य उशती सुवासाः।'[२२] इति।

अत एव शब्दसंस्कारः शब्दब्रह्मप्राप्तिसाधनत्वेन निर्दिश्यते भगवता भर्तृहरिणा –

[२१] *वैयाकरणभूषणसारः*, प्रभाटीका।

[२२] *ऋग्वेदः* – १०.७१.४.





"तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते।।"

- इति कृतं पल्लवितेनेति शिवम्।

## परिशीलिता ग्रन्थानुक्रमणी


➢ संस्कृतभाषोपनिबद्धा ग्रन्थग्रामाः

*अष्टाध्यायी* (पाणिनिरचिता). (सम्पा.) तपनशङ्करभट्टाचार्य्यः, कोलकाता, संस्कृत बुक डिपो, २००६.

*परमलघुमञ्जूषा* (नागेशप्रणीता). *भावप्रकाशिका-बालबोधिनी*-संस्कृतहिन्दीव्याख्योपेता, (सम्पा.) जयशङ्करलालत्रिपाठी, वाराणसी, चौखम्बा कृष्णदास अकादेमी, २०११ (चतुर्थसंस्करणम्).

*परमलघुमञ्जूषा* (नागेशविरचिता), *किरणावली*-संस्कृतव्याख्योपेता हिन्द्यनुवादसहिता, (व्याख्याता) लोकमणिदाहालः, वाराणसी, चौखम्बा सुरभारती प्रकाशन, २०११ (पुनर्मुद्रितसंस्करणम्).

*वाक्यपदीयम्* (भर्तृहरिरचितम्). तृतीयकाण्डस्य द्वितीयभागः, (सम्पा.) रघुनाथशर्मा, वाराणसी, चौखम्बा सुरभारती प्रकाशन, १९९७.

*वैयाकरणसिद्धान्तकौमुदी* (भट्टोजिदीक्षितविरचिता). *बालमनोरमा*-तत्त्वबोधिनी-सहिता (प्रथमो भागः), (सम्पा.) गिरिधरशर्मा परमेश्वरानन्दशर्मा च, दिल्ली, मोतीलाल बनारसीदास, २०१० (पुनर्मुद्रितसंस्करणम्).

*व्याकरणमहाभाष्यम्* (पतञ्जलिप्रणीतम्). भाष्य-*प्रदीपोद्योत*-सहितम् (द्वितीयखण्डः), (सम्पा.) शिवदत्तशर्मा, दिल्ली, चौखम्बा संस्कृत प्रतिष्ठानम्, २००३ (पुनर्मुद्रितसंस्करणम्).

➢ वङ्गभाषोपनिबद्धौ ग्रन्थौ

गङ्गोपाध्याय, मृणालकान्ति. *वाक्यपदीये साधनसमुद्देश*. कोलकाता, संस्कृत बुक डिपो, २०१४.

पण्डा, अशोक कुमार. *वैयाकरणसिद्धान्तकौमुदी अजन्तपुंल्लिङ्गप्रकरण*. कोलकाता, प्रग्रेसिभ पाब्लिशार्स, २०१२.


**********************************

# Ways of Absolute Knowledge in Jnana-Karma-Sannyasa Yoga of Srimad Bhagavad Gītā

**Dr. Santosh Kumar Behera**

Associate Professor

Department of Education, Kazi Nazrul University,

Asansol, Paschim Bardhaman, West Bengal, India, Email:

santosh.behera@knu.ac.in

**Abstract:**

Bhagavad Gītā is the most cherished gem for the upliftment and enrichment of human society forever. Out of 18 chapters of Bhagavad Gītā Jnana-Karma-Sannyasa Yoga is very well known. It affords gigantic strategies for the achievement of knowledge. *Jnana* or knowledge that disperses all doubt is a vigorous feature. Knowledge is the significant basis for the exposure of the absolute reality. The derivation of the word *Jnana* is from the root *jna* with the suffix *lyut*. The word knowledge has been used in several meanings in various chapters according to the context like in the sense of discrimination developed through a study of the scriptures and the teachings of saints (12 / 12, Gita), the very embodiment of eternal knowledge and bliss (17/13, Gita), the study and teaching of the scriptures (42/18), the various means of attaining wisdom (11/13, Gita), revealing the supreme (16/5), the uttermost wisdom (2/14), knowledge of the truth about God (36/4). This paper wants to focus on the knowledge of absolute truth or supreme reality as outlined in the fourth chapter of Bhagavad Gītā. The beauty of knowledge, the understanding of God, the personification of eternal knowledge





and happiness, supreme peace and supreme happiness and the techniques of obtaining that knowledge are the various points delineated here.

**Keywords:** Knowledge, Absolute Knowledge, Happiness, Peace, Truth, God, Action

## Introduction:

The knowledge of Bhagavad Gītā is inevitable for the mankind. As it contains the guidelines of the knowledge of absolute truth, it helps a lot for the downtrodden updated modern people. Various types of knowledge are given in eighteen chapters of Bhagavad Gītā. But this paper is deals with only Jnana-Karma-Sannyasa Yoga out of them. According to Ghanaian diplomat Kofi Annan *"knowledge is power. Information is liberating. Education is the premise of progress, in every society, in every family"*. According to Dr.APJ Abdul Kalam *"... knowledge makes you great"*. Generally 'jñāna' means knowledge about anything or cognizance (Williams, 1899). Here the word 'jñāna' is similar with spiritual wisdom or knowledge of reality. Thus, 'Jñāna-yoga 'means the yoga as based on the acquisition of true knowledge. 'jñāna' is derived from the root 'jñā'(to know) with the suffix 'lyut'(Vasu & Vasu, 2015). In equity and scriptural or book knowledge are also covered by the term 'jñāna'. It is also known as the 'path of knowledge' or the 'path of self-realization'. In order to open the door to wisdom, prosperity and happiness, the key is knowledge. The knowledge is power. The person with knowledge can have the control over the situation, over its life. If we look around our self, we will find that the scientific discoveries made our life so much different than we used to live past thousands of years, and it is all about knowledge. Now a day we avail great facilities in various fields because of advancement and revolution of knowledge in different areas.

**Concept of Absolute / True Knowledge:**

Mankind has an immense thirst for the knowledge and it made them unbeatable in this world. Our ancient ṛishi considered the knowledge as a gift from the God. According to Swami Vivekananda, "the gift of knowledge is the highest gift in the world". The man with improper knowledge or no knowledge can be very dangerous for himself and for the society. Absolute knowledge is that knowledge which opens the door to the realization of God, the attainment of eternal knowledge and bliss, supreme peace and happiness. It has also the power to make a better society. For the developing country like India, education is the prime requisite. In this paper knowledge does not indicate the different aspects of worldly knowledge rather it refers the knowledge of truth about the supreme spirit. There is nothing in this world more sacred than the divine knowledge. One who obtains success in this yoga of divine knowledge recognizes this truth in inner self in due course of time. It is told in Gītā-

*"na hi jñānena sadṛśaṃ pavitramiha vidyate |*

*tatsvayaṃ yogasaṃsiddhaḥ k heart ālenātmani vindati"* || (38 /4)

From this verse we came to know that on this earth there is no purifier as great as knowledge, one who has attained purity of heart through a prolonged practice of *Karmayoga* automatically sees the light of truth in the self in course of time (Swami, 2016). The visible material world is transitory and the product of māyā or delusion. When we are influenced by that we will gain the symptoms of ignorance. The ignorance is the cause of our bondage, and the cause of our liberation is true or absolute knowledge. This knowledge is the complete fruit of sacred service, and he does not look for peace elsewhere when one is situated in transcendental knowledge, because he enjoys peace within himself. Knowledge is the best





purifier. So how will we get knowledge? The answer is only by practice we wipe out our sin and purify us. Practices means the performance of sacrifices, charity, penance, adoration and worship, vows and fasts, breath-control, control of the senses and mind, self-restraint, japa and meditation etc.; these are all means for attainment of knowledge. These are very helpful in the revelation of knowledge. There is nothing on earth as purifying as the knowledge of truth about God. That is why Arjuna extols the lord in the following words "You are the ultimate reality, the supreme abode, the greatest purifier"(10/12) and the great Bhīṣma also said, "God is the greatest of all purifiers, and the most auspicious among all auspicious objects"(Maha.Anu.189-90)(Dharma, 1999). Thus the glory of knowledge is the key for attainment of supreme peace as its fruit.

**The Eligibility for Realizing Absolute Knowledge:**

The eligibility for realizing knowledge is the revelation to truth. One who is completely rid of passion, fear and anger, develops exclusive love for God, have taken refuge in God, depend on God for everything, remain ever content in God, being purified by the penance of wisdom will be able to realize the fruit of the divine nature of his birth and activities of God. Thus the Lord after describing the divine character of his activities and value of knowing this secret in reality instructed Arjuna to take acts in a disinterested manner. However, it is impossible to carry out one's responsibilities without knowing the reality what constitutes action and what constitutes inaction. As a result, the Lord vows to reveal to Arjuna the truth about transcending activities that are free of feelings of possession, doership, attachment, and the desire for fruit, demonstrating their subtle nature and value of its knowledge.

Next, we see in various ways the non-attachment of the *Sadhakas* who see the glory of seeing inaction in action, and action in inaction. The man of wisdom never does anything which is either prohibited or purposeless. The actions of the saint who has reached perfection through the practice of Karmayoga, these are invariably free from desire and thoughts of the world. None of his acts is tainted by desire or thoughts of the world, e.g., a wife, progeny, wealth, a house to live in, honour, prestige, fame etc. or bears a character which is denounced by the scriptures. It is mentioned in the verse no.19, chapter four of Gita that "*jnanagnidagdhakarmanam tamahuh panditam budhah*". The word 'jnanagni,' which means 'fire of wisdom,' refers to the genuine knowledge of God that comes as a result of perfection in any discipline. The fire of wisdom transforms all activities to ashes, just as fire burns fuel to ashes. Wisdom has been referred to as 'fire' in order to emphasise its kinship with fire in this regard. A fried seed is simply a seed in name, just as a fried seed is only a seed in name.

Human beings develop a natural attachment to the duties they perform in the form of sacrifices, charity, penance, and vocational duties sanctioned by the scriptures, only in the interest of the world order, without any feelings of possession, attachment, desire for fruit, or egoism, as such duties are necessary for keeping the body and soul together. So much so that he can't stop himself from performing them, and he becomes so engrossed in them that he forgets about God and loses consciousness of everything else. Giving up connection to acts and renunciation of the feelings of possession, attachment, and desire with regard to all the happiness of this world and the next is what it means to be free of this form of attachment. It is meant by giving up attachment to the fruits of activities, which are gained through the fruit of such accomplishment. As a result, his acts do not tie him.





After letting go of attachment to deeds and their results, the Sadhaka should let go of the sense of "I" and "my" in relation to the body. This will remove from his mind the awareness of a specific thing or person serving as the very foundation of his existence and being absolutely necessary or indispensable for the proper functioning of his body. This is what it means to stop relying on the outside world. Man no longer requires anything from this world and all of his wishes are spontaneously fulfilled once he reaches this state. He is continually steeped in joy, and he remains unaffected under all circumstances, having recognised God, who is the personification of supreme ecstasy. The God-realized man of perfection has no use for either completed or uncompleted tasks; As a result, he is never bound by the binding impact of action, whether he performs or refrains from doing so. As a result, we must strike a balance between success and failure.

Man has the inherent right to work (2/47); for having created mankind along with the spirit of sacrifice or duty, the Creator commanded man to work (3/10) (Goyandaka, 2011). Thus, by refusing to work in obedience to this command man incurs sin (3/16). Besides, it is hardly possible for man to renounce work altogether (3/5); everyone is helplessly driven to action in one form or another according to his natural tendencies. Thus the statement 'even though acting, he is not bound' simply means that just as the *Samkhyayogi* who has given up worldly enjoyments and performs sheer bodily actions is not tainted with sin, even though refusing to carry on his other duties, even so the *Karmayogi*, though performing his prescribed duties, does not succumb to the action's binding effect. All the actions of a person melt away who is free from bondage or attachment, who has no identification with the body and does not claim it as his own, whose mind is established in the knowledge of self, remains ever conscious of God during every action, sees Brahma everywhere and in everything (*jnanavasthitacetasah*; 23/4, Gita) and who

works merely for the sake of sacrifice. The Shruti text also says "All this is verily Brahma" (Lokeswarananda, Chandogya., III.xiv.1). Thus, in dissociating oneself from the objective world, and seeing the soul and the Over-soul as one. The distinction between the soul and the Over-soul. Because of ignorance and the body's limitations, has been felt for an indefinite period of time. The practise of knowledge pushes aside this idea of diversity, which is based on ignorance. In other words, the soul is dissolved or merged into the Over-soul or Brahma by circling in the mind and contemplating on the truth received from the scriptures and the preceptor's lips., the embodiment of eternal knowledge and happiness, being outside the sphere of Prakruti. All scripture-mandated duties and practises for God-realization known by the common name of 'sacrifice' are performed through the action of mind, senses and body which are the products of *Prakruti* ; the soul has nothing to do with them. Therefore with respect to any action or practice, the yogi in the path of knowledge should never consider himself the doer.

Without action in the form of activity of the mind, senses and body God-realization, or liberation from the bondage of *Karma* cannot be attained (3/4). All practices enunciated for the attainment of liberation from the bondage of *Karma* have to be carried on through the activities of the mind, senses and body. Therefore, *Sadhakas* who desire to realize God or seek liberation from the binding effects of *Karma* should invariably devote themselves to some form of spiritual practice renouncing egoism, the feeling of possession, the desire for fruit and attachment for actions.

**Ways of True Knowledge or Absolute Knowledge:**





The cultivation of the right mental attitude is more important than material things for the attainment of true knowledge. Thus the lord declares sacrifice through knowledge as superior to sacrifice performed with material things. There are various forms of sacrifices mentioned in the Gita, viz., sacrifice with factual properties, sacrifice in the shape of rigours, sacrifice through yogic practice, sacrifice through the research of sacred texts, the form of wisdom. The highest goal to be reached through these practices is the achievement of knowledge of God. A person who realizes God through the realisation of true knowledge has obtained everything in life, nothing more to gain. Therefore the Lord commanded Arjuna in verse no.34, chapter four of Gita to attain that true knowledge of God which is the fruit of all spiritual practices. Only by God realisation, man can obtain liberation from the bondage of Karma in the circle of births and deaths. In this verse the Lord tells that confidence, respect and ingenuousness of heart are prime requisites for the achievement of knowledge. Thus, one who wishes to get knowledge should follows the path of the preceptor with trust and reverence in his heart, and surrendering himself completely to the preceptor, serve him to the best of his ability (Prabhupada, 2015). If he pursues himself in this manner, a beam of knowledge will flow in the mind of the wise preceptor to help the disciple with true knowledge, even as the udder of the cow gets wet with milk out of affection for her calf, or milk begins to flow through the mother's breasts out of affection for her child. For this reason *Shruti* says:- "For the knowledge of truth, the seeker of knowledge should humbly approach the God-realized man possessed of knowledge of the Vedas, taking a handful of sacrificial wood, or any other present with him"(*Mundaka, I.ii.12*) (Gambhirananda, 2010).

If the vessel strikes a rock or a gale overtakes it, it is possible for a man crossing the sea by a boat to drown. But the boat in the form of knowledge is eternal: he

who takes refuge in it is sure to cross over all sins. Just like the blazing fire turns the fuel to ashes, so also the fire of knowledge turns all actions to ashes. The main factor contributing to the attainment of knowledge is faith. The greater the degree of faith one brings to bear on his practice for knowledge, the sooner is it able to bring about the revelation of truth. Any action like sacrifice, charity, penance etc. done without faith has been declared to be fruitless (28/17, Gita). One will not thereby attain knowledge. Otherwise we can say that man with devoid of faith lost the spiritual path. We obtain it in verse no. forty: '*samshayatma vinashyati*' (40/4, Gita). So it is the faith which gives the impetus to one's *sadhana* or spiritual practice. Suppose a man loves money and starts a business. If he believes that he will get money through that business, he will take to it so wholeheartedly that he will not grudge undergoing any amount of physical discomfort due to irregularity in meals, sleep, rest and so on. On the other hand, increase of wealth will bring more and more delight to his heart. Thus, when one comes to develop faith in knowledge of the truth relating to God, which opens the door to the realization of God, the embodiment of eternal knowledge and bliss and the best power of supreme peace and supreme happiness indicates that just as the moment the sun makes its appearance in the horizon, darkness is lifted and all objects become visible, so the moment the reality of God is known ignorance disappears and God is revealed (5/16, Gita). Lack of earnestness in one's practice is a sure sign of lack of faith. In order to indicate this fact Lord has mentioned it very nicely- "*shraddhavallabhate jnanam tatparah samjatendriyah*"(39/4,Gita). So it is clear that the man of faith attains supreme knowledge and that knowledge leads to the attainment of supreme peace and supreme bliss. All the human beings should follow this right path.

**Conclusion:**





From the above analysis, it may accomplish that the path of spiritual realization or obtainment of true or absolute knowledge is definitely very tough. The refinement of the right mental attitude is more important than material things f or the attainment of absolute knowledge. The *Bhagavatam* (6.3.19) says "*dharmam tu sakshad bhagavat-pranitam*" (Prabhupada, 2001). It means the path of religion is directly enunciated by the lord. Therefore, mental speculation or dry arguments cannot help and lead one to the right path. One cannot be spiritually rich by independent study of books of knowledge. Thus, one should follow the directions, strategies and ideologies of the Bhagavad Gītā with confidence, respect and assurance to gain knowledge of truth, as it is instructed by the Lord. One should surrender to the lord whole heartedly by pursuing his instructions. Then only a person becomes free from all doubts, worldly bondages and attachments by the elegance of transcendental knowledge. At this stage a man is not afflicted by any material thing like pain, pleasure, sorrow, desire and stress etc. Because he recognizes that he came alone and he will also go alone. Nothing will go with him. By grasping the absolute knowledge man obtains eternal peace which is the ultimate goal of everyone.

**References:**


1. Dharma, K. (1999). Mahabharata, U.S.: Torchlight Publishing.
2. Gambhirananda, S. (2010). Mundaka Upanishad. India: Advaita Ashrama.
3. Goyandaka. J. (2011). Srimadbhagavadgita, Gorakhpur: Gita Press.
4. Lokeswarananda, S., Chandogya Upanishad, Kolkata: Ramakrishna Mission Institute of Culture.
5. Prabhupada, A.C.B.S. (2001). Śrīmad Bhagavatam, Mumbai: Bhaktivedanta Book Trust.

6. Prabhupada. A.C.B.S. (2015). Bhagavad-gitā As it is, Mumbai: Bhaktivedanta Book Trust.
7. Swami. S. (2016). Śrīmad Bhagavad Gītā, Delhi: Advaita Ashrama (Publication Department).
8. Vasu, V. P., & Vasu, H. (2015). Śabdakalpadruma, Varanasi: Chaukhamba Surabharati Prakasana.
9. Williams, M. M. (1899). A Sanskrit-English Dictionary. Delhi: Motilal Banarasidass.






# आदिवासी कविता का आत्म पक्ष

कविता के आत्म पक्ष पर बात करने से पहले उन तथ्यों को जानना आवश्यक हैं, जो काव्य सृजन के साथ जुड़े हैं। कविता का जन्म कैसे हुआ होगा ? इस संदर्भ में उस घटना को देख सकते हैं जिसमें महाकवि 'वाल्मीकि अपने शिष्यों के साथ 'तमसा' नदी तट पर जाते हैं, जहाँ वन में एक स्थान पर उनकी दृष्टि असावधान क्रौंच पक्षियों के रतिक्रिया में मग्न एक जोड़े पर पड़ती है, तभी निषाद राज के बाण द्वारा एक पक्षी घायल मृत अवस्था में पड़ जाता है, दूसरा पक्षी अपने साथी की उस अवस्था को देखकर कुन्दन करने लगता है। यह सारा परिदृश्य देखकर वाल्मीकि का हृदय द्रवित हो जाता है और उनके मुख से जो शब्द (' मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः यत्क्रौंचमिथुनादेकम् अवधीः काममोहितम्।') निकल आते हैं वही से कविता का आरंभ माना जाता है। छायावाद के आधार स्तंभ सुमित्रानंदन पंत भी कहते है कि 'वियोगी होगा पहला कवि आह से उपजा होगा गान , निकल कर आंखों से चुपचाप बही होगी कविता अनजाना' जब हम इन संदर्भों को देखते हैं तब हमें यह ज्ञात होता है कि कविता के केंद्र में आत्म पीड़ा का भाव व्याप्त रहा है। काव्य सृजन में भले ही कल्पना का आधार लिया गया हो, वह भले ही मनोरंजन या रसास्वादन मात्र के लिए मानी गयी हो परंतु कविता मनुष्य-जीवनादर्श के साथ सुख-दुःख एवं कटु अनुभवों को भी वाणी प्रदान करती है।

मुक्तिबोध भी कहते हैं- "सामान्यतः , यह देखा गया है कि कवि-व्यक्तित्व, अपनी कुछ विशिष्ट और प्रबल आवश्यकताओं के अनुसार , कुछ विशेष भाव श्रेणियों को ही प्रकट करता रहता है , मानों वे उसके जीवन के स्थाई भाव हों। उन्हें प्रभावोत्पादक रूप से प्रकट करने के उसके अथक निरंतर परिश्रम के तथा अभ्यास के फलस्वरूप धीरे-धीरे एक अर्से बाद , उसकी वे भाव-श्रेणियों और उनकी अभिव्यक्ति , एक सगठित इकाई बनकर , साहित्यिक 'कंडीशंड रिफ्लेक्स' का रूप धारण कर लेती है।" (पृ. 212 मुक्तिबोध रचनावली : 5) कुछ इसी प्रकार का

भाव हमें बालकृष्ण भट्ट के चिंतन में भी दिखाई पड़ता है। वे अपने निबंध 'साहित्य जनसमूह के हृदय का विकास है' के आरंभ में कहते हैं कि "प्रत्येक देश का साहित्य उस देश के मनुष्य के हृदय का आदर्श रूप है। जो जाति जिस समय जिस भाव से परिपूर्ण या परिलुप्त रहती है वे सब उसके भाव उस समय के साहित्य की समालोचना से अच्छी तरह से प्रकट हो सकते हैं। मनुष्य का मन जब शोक-संकुल, क्रोध से उद्दीप्त , या किसी प्रकार की चिंता से दोचित्ता रहता है तब उसकी मुखच्छवि , तमसाच्छन्न, उदासीन और मलिन रहती है ; उस समय उसके कंठ से जो ध्वनि निकलती है वह भी या तो फूटही ढोल समान बेसुरी, बेताल, बेलय या करुणापूर्ण, गदगद तथा विकृत-स्वर-संयुक्त होती है।" (पृ. 109, निबंध निलय , सं. डॉ. सत्येंद्र) रामचंद्र शुक्ल भी अपने इतिहास में साहित्य को समाज का 'संचित प्रतिबिंब' मानते हैं। जब साहित्य में मानवीय हृदय के संवेगों की अभिव्यक्ति होती है तब वह अभिव्यक्ति उसके आत्म पक्ष को भी रेखांकित करती है। इसलिए यह कहना भी गलत नहीं होगा कि कोई भी साहित्य क्यों न हो वह व्यक्ति के आत्म पक्ष से जुड़ा होने के साथ सामाजिक पक्ष के साथ भी जुड़ा हुआ होता है।

जब हम आधुनिक काल का चिंतन (विशेष रूप से दलित, स्त्री, आदिवासी साहित्य) को देखने की कोशिश करते हैं तब हमें उस साहित्य में आत्म पक्ष का भाव प्रबलता के साथ दिखाई पड़ता है। दलित और स्त्री साहित्य तो आत्म पीड़ा की ही अभिव्यक्ति है आदिवासी काव्य इन तथ्यों से भिन्न कैसे रह सकता है। आदिवासी कविता में भी तब कवि अपने 'स्व' के साथ प्रेम , सौंदर्य, प्रकृति, अपने अस्तित्व की तलाश , सांस्कृतिक विघटन , जल जंगल जमीन जैसे मुद्दों को दर्ज करते हैं। यह कहना गलत नहीं होगा कि उपरोक्त सभी तथ्य आदिवासी कविता के केंद्र में हैं। आदिवासी चिंतक भी इन बिंदुओं की ओर संकेत करते हैं। उनका कहना है कि– "प्रकृति प्रेम , श्रम की महत्ता , जो उनके दर्शन और सहजीवी जीवन का मूल तत्व है , इस बिखराव , लूट और चौतरफा सांस्कृतिक-आर्थिक हमले से गहरे संकट में है , जिससे उनके समकालीन गीत-कविता व 'कहन' शैली और स्वर दोनों में बदलाव का पोषिक आहार दिखाई पड़ता है।" (पृ. 8 लोकप्रिय





आदिवासी कविताएँ, सं. वंदना टेटे) शायद यही कारण है कि वर्तमान कवि किन्ही एक दो बातों में अपने तथ्य प्रस्तुत नहीं करता है अपितु विस्तार से अपनी योजनाओं को व्यक्त करता है। उसकी आत्माभिव्यक्ति समष्टि का स्वरूप धारण कर लेती है अर्थात् कवि स्वयं के बहाने समग्र आदिवासी समुदाय की चिंता को सामने ले आता है।

आज कवि जो कुछ भी देख रहा है , समझ रहा है, अनुभव कर रहा है, उसका सही-सही प्रकटीकरण कर रहा है। कवि अपने आत्म पक्ष को प्रस्तुत कर रहा है। आदिवासी चिंतक गंगा सहाय मीणा लिखते हैं- "आदिवासी दर्शन में व्यक्ति या आत्म के बजाय सामूहिकता और सामाजिकता महत्वपूर्ण है और उसे अभिव्यक्त करने का सशक्त माध्यम कविता ही हो सकती है।" (पृ. 51, आदिवासी चिंतन की भूमिका , गंगा सहाय मीणा) यह तथ्य सही है कि आदिवासी कविता में व्यक्ति की जगह समूह को या सामाजिकता को अधिक महत्व दिया गया है। लेकिन जब बात अभिव्यक्ति की आती है तब कोई भी कलाकार 'स्व' को भी दर्ज करता है। तब वह केवल अपनी मात्र अभिव्यक्ति दर्ज नहीं करता अपितु उसका 'स्व' 'पर' में तब्दील हो जाता है, उसकी आत्म चेतना सामाजिकता को समाहित कर लेती है। एक तरह से कवि अपने भावों द्वारा संपूर्ण समुदाय का प्रतिनिधित्व करता है। कविता तो उसकी अभिव्यक्ति का सशक्त माध्यम है ही इसमें कोई संदेह नहीं।

समकालीन आदिवासी कविता कविता के कुछ मुख्य बिंदु हैं जो उसके आत्म पक्ष को दर्शाते हैं। वे बिंदु कौन-से हैं? उनकी अभिव्यक्ति किस रूप में हुई है? और उसका फलित क्या है? क्योंकि केवल आत्म पक्ष को रेखांकित करने का मतलब यह नहीं होना चाहिये कि कवि अपनी पीड़ा, दुःख-दर्द आदि की ही अभिव्यक्ति करें, अपनी दीन-हीन एवं बुराइयों से ग्रस्त स्थिति को ही दर्ज करें। समष्टि से उसका कोई संबंध न हो। आत्मपक्ष को हमें व्यापक एव सकारात्मक अर्थ में लेना होगा तभी तथ्यों की वास्तविक पहचान होगी। आदिवासी कवि इस प्रकार की सभी समस्याओं से अवगत हैं। इसलिए उसकी कविता का भाव 'आदिवासियत' को केंद्र में रखकर

समग्र आदिवासी जीवनादर्श प्रस्तुत करता है। विकास की बाढ़ में हो रहा विनाश का अट्टहास, नष्ट होती सांस्कृतिक धरोहर, अपने अस्तित्त्व की चिंता उसे सताती है। कवि पूछता है, अपने साथी से प्रश्न करता है और कहता हैं- "चुप क्यों हो संगी? कुछ तो कहो?" (पृ. 41 लोकप्रिय आदिवासी कविताएँ, सं. वंदना टेटे) यानी आदिवासी कवि प्रश्न करता है। सचेत करता है। अपनी अवस्था से परिचित है। अपनी संपूर्ण आपबीती एवं आदिवासी समाज के हो रहे शोषण को केवल व्यक्त ही नहीं करता बल्कि प्रतिरोध के लिए भी प्रेरित करता है। महादेव टोप्पो की 'प्रजातंत्र में' कविता की कुछ पंक्तियाँ देख सकते हैं जिसमें कवि अपने अधिकारों, अस्तित्त्व एवं संस्कृति को बचाने के लिए व्यवस्था से सीधे-सीधे चुनौती देता है, अपनी मांगें रखता है। वह स्वयं को दर्ज करना चाहता है, अपनी भाषा, संस्कृति को आधार प्रदान करना चाहता है।

"रोटी तो हम मांगेंगे ही
कटते वृक्षों के साथ चिपकेंगे भी
छिनती जमीन के खातिर देंगे जान भी
मरती अपनी भाषा की खातिर
मांगेंगे तुम्हारे अखबार में दो कॉलम भी
रेडियो, टीवी में कुछ घंटे का प्रसारण समय भी" (पृ.22, जंगल पहाड़ के पाठ, महादेव टोप्पो)

इसी प्रकार ग्रेस कुजूर भी अपनी कविता में आत्म पीड़ा को व्यक्त करती हैं। अपने साथी से जल, जंगल, जमीन, 'अपने होने' अर्थात् आदिवासी संस्कृति एवं अपने अस्तित्त्व के सवाल को उठा रही है। कवयित्री जानती है कि अपने प्रश्नों का हल पंडितों के हाथों नहीं होगा, पेट भरने के लिए, अस्मिता एवं अस्तित्त्व को बचाने के लिए जल, जंगल, जमीन की आवश्यकता है। कवयित्री यहाँ अपने जड़ों से जुड़ना चाहती है। इसलिए वह उत्तर की तलाश में साग के वृक्ष की भांति चुपचाप खड़ी है और अपने साथी से प्रश्न भी कर रही है।

"जल, जंगल, जमीन के बिना





साल वन के जीवन का व्याकरण
किन पंडितों के हाथों
तुमने गिरवी रखा है संगी?
कोटरों से निकल अपने
साल वन के सुग्गे भी
पूछ रहे हैं
अपने होने का पता।
तुम्हारे उत्तर की प्रतीक्षा में
संगी
अब भी खड़ी हूं मैं
चट्टान में खड़े
इकलौते-साल-वृक्ष की तरह,
जो चुपचाप सींच लेता है
अपने हिस्से का पानी।" (पृ. 41 लोकप्रिय आदिवासी कविताएँ, सं. वंदना टेटे)

आदिवासी जीवन की सारी संवेदना एवं संभावनाएँ अपने अस्तित्व एवं अस्मिता से जुड़ी हुई है। इन पक्षों को आदिवासी कवि कविता के माध्यम से ही स्पष्ट करता है क्योंकि आज भी उसे वह मंच प्रदान नहीं किया गया है। उसको वह अवसर प्रदान नहीं किये गए हैं जो उसे मिलने चाहियें थे, इस बात का दुःख आदिवासी कवि को है। वह कहता हैं-

"हम मंच पर गए ही नहीं
और हमें बुलाया भी नहीं गया
उंगली के इशारे से
हमें अपनी जगह दिखाई गई

हम वहीं बैठ गए;

हमें शाबाशी मिली

और वे मंच पर खड़े होकर

हमारा दु:ख हमसे ही कहते रहे

'हमारा दु:ख हमारा ही रहा

कभी उनका नहीं हो पाया'' (पृ. 50 लोकप्रिय आदिवासी कविताएँ, सं. वंदना टेटे)

हम जानते है कि शिष्ट कहे जानेवाले साहित्य में समग्रता का भाव तो हैं लेकिन वह कथित शिष्ट लोगों के ही मुक्ति की बात करता है, उस साहित्य से 'आदिवासियत' का भाव कोसों दूर है। आदिवासी कविता में प्रकृति प्रेम, प्रकृति का मानवीकरण एवं श्रम का सौंदर्य जिस दृढ़ता के साथ व्यक्त हुआ है वह अन्य साहित्य में कम ही देखने को मिलता है। कवि उन तथ्यों की ओर संकेत ही नहीं करता अपितु समग्र मानवता की बात करता है।

अत: यह कहा जा सकता है कि आदिवासी कवि अपनी भावनाओं, विचारों का एक काल्पनिक जाल नहीं बुनता है वरन् नैसर्गिक मूल्यों एवं आत्म पक्ष को यथार्थ के साथ प्रस्तुत करता है। वंदना टेटे के शब्दों में कहा जाय तो आदिवासी कविता ''उपचार के लिए उपचार के पहले, उपचार के दौरान और उपचार के बाद गाया जानेवाला सबसे जरूरी उपक्रम'' (पृ.12 लोकप्रिय आदिवासी कविताएँ, सं. वंदना टेटे) के रूप में प्रस्तुत होती है। और यह भी देखा जा सकता है कि आदिवासी काव्य में आत्म पक्ष व्यापक अर्थ में प्रस्तुत हुआ है। कवि संपूर्ण विश्वास के साथ सृष्टि के सौंदर्य एवं मानवीय जीवन के विभिन्न रंगों, अपना अस्तित्व एवं अस्मिता तथा अपने 'होने' के अर्थ को स्पष्ट करता है। कवि 'आदिवासियत' को केंद्र में रखकर समग्र आदिवासी जीवन दर्शन प्रस्तुत करता है।





संदर्भ ग्रंथ सूची

1 टेटे, वंदना. (2017). (सं.) लोकप्रिय आदिवासी कविताएँ. प्रभात प्रकाशन : दिल्ली.

2 जैन, नेमिचंद्र. (2011). (सं.). मुक्तिबोध रचनावली : 5. राजकमल प्रकाशन : दिल्ली.

3 डॉ. सत्येंद्र. (2011). (सं.) निबंध निलय. वाणी प्रकाशन : दिल्ली.

4 मीणा, गंगा सहाय. (2017). आदिवासी चिंतन की भूमिका. अनन्य प्रकाशन : दिल्ली.

5 टोप्पो, महादेव. (2017). जंगल पहाड़ के पाठ. अनुज्ञा बुक्स : दिल्ली.

6 http://www.brandbharat.com/hindi/literature/sanskrit/vaalmeeki.html

डॉ. संतोष गिरहे

सहायक प्रोफेसर

हिंदी विभाग

राष्ट्रसंत तुकडोजी महाराज नागपुर विश्वविद्यालय,नागपुर

पीन कोड-440033

मोबाईल-9421971832

ईमेल-santoshmgirhe@gmail.com

# चातुर्मास्यप्रयोग इति हस्तलिखितग्रन्थस्य कानिचित् वैशिष्ट्यानि

नव कुमार दासः, सहकारी-अध्यापकः, सीतानन्दकलेज्, प.ब

गवेषकः, रवीन्द्रभारतीविश्वविद्यालयः, कोलकाता

Postal address: Naba Kumar Das

Vill- Salika Dhanichak, P.O - Haridaspur,

Dist- Purba Medinipur, State: West Bengal. PIN - 721653

9681699813, nkdassnc@gmail.com



व्यासश्रीः Vol. XX ISSN 2320-2025

चातुर्मास्यप्रयोग इति हस्तलिखितग्रन्थस्य कानिचित् वैशिष्ट्यानि

नव कुमार दासः, सहकारी अध्यापकः, सीतानन्दकलेज्, प.ब.

गवेषकः, रवीन्द्रभारतीविश्वविद्यालयः, कोलकाता

श्रौतकार्यो हि श्रुतेर्मुख्यो विषयः। यज्ञकर्मणि एकैकानां वेदमन्त्राणां विनियोगो जायते। तदाम्नातम् - 'आम्नायस्य क्रियार्थत्वाद् आनर्थक्यमतदर्थानाम्'। मन्त्रब्राह्मणात्मकस्य वेदस्य[1] ब्राह्मणांशे श्रौतकर्माणि विधिर्थत्वाद् निन्दाप्रशंसा-पुराकल्प-परकृतिरित्यानेन विस्तृतमाम्नातम्। अवरे काले वेदपुरुषस्य बाहुस्वरूपे कल्पवेदाङ्गे[2] यज्ञभावना विततं जातम्। अपि च सायणाचार्येण भाषितम् ऋग्भाष्यभूमिकायां - "कल्प्यते समर्थ्यते यागप्रयोगोऽत्र' इति। चत्वारि सूत्रसाहित्यानि कल्पशास्त्रस्य अङ्गानि। तदुक्तं तेन - 'कल्पस्तु आश्वलायनापस्तम्बबौधायनादि सूत्रम्'।[3] तत्र सर्वत्रमेव यज्ञाः सुकथिताः। अनन्तरमर्वाचीनकाले यज्ञपद्धतिमनुसृत्य अनेकाः प्रयोगग्रन्थाः सृष्टाः।

मीमांसका असिध्यन् यत् 'स तु यज्ञो देवतोद्देश्येन द्रव्यत्यागात्मको याग इति क्रियाविशेषः"।[4] वेदे यज्ञस्य प्राशस्त्यं पुनः पुनः आम्नानम्। यज्ञेषु विशिष्टो यागः चातुर्मास्ययागः - "स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः"।[5] गोपथब्राह्मणे सप्त यज्ञेषु चातुर्मास्ययागस्य महत्त्वं निगदितम्।[6] अवरे कालेऽपि सूत्रकारैः श्रौतसूत्रकारैर्वा चातुर्मास्ययज्ञः सविस्तारं व्याख्यातः। यज्ञेनानेन यजमानः स्वर्गं प्राप्नुयुरिति आम्नानम्। मीमांसितं तद् जैमिनीयधर्ममीमांसादर्शने - "चातुर्मास्यैः

[1] 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' आप. श्रौ. 24/1/31

[2] "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते" पा. शि. 41

[3] ऋग्भाष्योपक्रमः

[4] यज्ञपरिभाषासूत्रम्

[5] ऐतरेयारण्यकम् 2/3/3

[6] गोपथब्राह्मणम् 1/5/7

स्वर्गकामो यजेत"[2] इति। आसीदिदं श्रौतकर्म जनप्रियमिति मन्यते यतः *New Catalogous Catalogurum* इति ग्रन्थे चातुर्मास्ययज्ञस्य प्रभूता मातृकाः परिलक्षिताः। मातृका इमाः सर्वमेव चातुर्मास्ययागस्य प्रयोगशास्त्राः। आसां सर्वा अद्यपि अप्रकाश्यन्ते, क्रमशः क्षयन्ते च। अतः चातुर्मास्ययज्ञपद्धतिं समीक्षात्मकसम्पानेन प्रकाशार्थं "चातुर्मास्यप्रयोग" इत्याख्यातं हस्तलिखितं ग्रन्थं निर्वाचिनोमि। समीक्षात्मकसम्पादने ग्रन्थस्यैकस्य तिस्रः ततोधिका वा मातृकाः प्रतोल्य संशुध्य विविच्य च शुद्धपाठं तथा ग्रन्थकर्तुः पाठं प्रयसनीयम्। विद्यन्ते सविमर्शसम्पादनस्य चत्वारः पर्यायाः । यथा १)सामग्रीसंकलनम् (Collection of materials), २)परिष्कृतपाठयोजनम् (Critical Recension), ३)पाठसंस्कारः(Emendation), ४)विमर्शनम् (Criticism)। अत्र विमर्शनस्य पर्यायद्वयमस्ति - उच्चकोटिकविमर्शनम्(Higher Criticism), साधारणविमर्शनं(Lower Criticism) च| अप्रकाशितग्रन्थस्य समीक्षात्मकसम्पादनस्य एवं विशिष्टांशमिदम् उच्चतरविमर्शनम्। अत्र ग्रन्थनाम, ग्रन्थकर्तृनाम, तस्य संस्तवः, रचनाशैली, कालः, भाषा, लेखनोपादानानि, लिपिकरस्य परिचयः, कालः, दोष इत्यादयो विषयाः पाठकसकाशे सुष्ठु प्रकाशन्ते।

*New Catalogous Catalogorum* इत्यस्य सप्तमे खण्डे चातुर्मास्यप्रयोग इति ग्रन्थस्य त्रिंशताधिकानां मातृकानां साधारणानि विवरणानि परिलक्ष्यन्ते। तासु काश्चन सम्पूर्णाः काश्चन अस्मपूर्णा वा। भारतस्य भिन्नेषु प्रदेशेषु ग्रन्थस्यास्य पाण्डुलिपयः प्रकीर्यन्ते। यथा वरोदानगरस्य मुम्बाइविश्वविद्यालयस्य च पुथिशालायां, कर्णाटकस्य गोकर्णनगरे, मुम्बाइनगरस्थिते कोलकातानगरस्थिते च एशियाटिकसोसाइटि इत्यस्य संग्रहालये चातुर्मास्यप्रयोगस्य पाण्डुलेखाः संरक्षिताः सुरक्षिताश्च। चातुर्मास्यप्रयोग इत्यस्य ग्रन्थस्य सविमर्शसम्पादनार्थाय मातृकाषट्कस्य प्रतिलिपयः महता प्रयत्नेन संगृह्यन्ते। एतासां विवरणानि अत्रोपस्थाप्यन्ते।

---

[2] 11/2/12





| पाण्डुलेख-क्रमांकः | ग्रन्थनाम | प्राप्तिस्थानम् | सम्पूर्णम् /असम्पूर्णम् |
|---|---|---|---|
| G248 | चातुर्मास्यप्रयोगः | एशियाटिकसोसाइटि, कोलकातानगरस्थम् | सम्पूर्णम् |
| G 1897 | चातुर्मास्यप्रयोगः | तत्रैव | असम्पूर्णम् |
| G 10634 | चातुर्मास्यप्रयोगः | तत्रैव | सम्पूर्णम् |
| M 578 | चातुर्मास्यप्रयोगः | एशियाटिकसोसाइटि, मुम्बाइनगरस्थम् | सम्पूर्णम् |
| J0001 | चातुर्मास्यप्रयोगः | श्रीवासुदेवनीलकण्ठजोग्लेकरमातृकाशाला, कर्णाटकप्रदेशस्य गोकरण इति स्थाने | सम्पूर्णम् |
| J0006 | चातुर्मास्यप्रयोगः | तत्रैव | असम्पूर्णम् |
| J0007 | चातुर्मास्यप्रयोगः | तत्रैव | असम्पूर्णम् |

आसु मातृकासु M 578 इति पाण्डुलेखे षट्-त्रिंशत् पत्राणि(Folio) सन्ति। यद्यपि *NCC* ग्रन्थे मातृकेयं चातुर्मास्यप्रयोगस्य अन्तर्गता परं इयं भिन्नगोत्रजा। अस्या ग्रन्थकर्ता कृष्णभट्टो नाम कश्चन विद्वान्। J0006 इति मातृकायां चतुर्दशपत्राणि सन्ति। इयमेव स्वगोत्रजा परमसम्पूर्णा। G 1897 इति पाण्डुलेखः सप्तपञ्चाशत्-पत्रविशिष्टः। मनोहरा हस्ताक्षरयुक्ता मातृकेयं कीटदंशिता क्षयप्राप्ता असम्पूर्णा च। अतः समीक्षात्मकसम्पादनार्थं G 248, G 10634, J0001 इति सम्पूर्णं मातृकात्रयं चयितम्। मातृकात्रयं पर्यवेक्ष्य अधीत्य च G 10634 इति मातृकां 'क'रूपेण चिह्नितं यत आसु इयं प्राचीनतमा, सुलिखिता, सुपद्धतियुक्ता(Methodology) च| ततः G 248 मातृकां 'ख'-रूपेण, J0001 इत्याख्यां 'ग'-रूपेण चिह्नितवान्। अत्र विशदं परिचाप्यते।

| क | ख | ग |
|---|---|---|
| चातुर्मास्यप्रयोगः G 10634 | चातुर्मास्यप्रयोगः, G 248 | चातुर्मास्यप्रयोगः (J0001) |
| ग्रन्थस्य नाम -चातुर्मास्यप्रयोगः | ग्रन्थस्य नाम -चातुर्मास्यप्रयोगः | ग्रन्थस्य नाम -चातुर्मास्यप्रयोगः |
| ग्रन्थकारः अज्ञातः | ग्रन्थकारः अज्ञातः | ग्रन्थकारः अज्ञातः |
| विषयः -वैदिकः | विषयः -वैदिकः | विषयः -वैदिकः |
| शाखा - तैत्तिरीयसंहिता (बौधायनश्रौतसूत्रम्) | शाखा - तैत्तिरीयसंहिता (बौधायनश्रौतसूत्रम्) | शाखा - तैत्तिरीयसंहिता (बौधायनश्रौतसूत्रम्) |
| भाषा - संस्कृतम् | भाषा - संस्कृतम् | भाषा - संस्कृतम् |
| लिपिः - देवनागरी | लिपिः - देवनागरी | लिपिः - देवनागरी |
| सम्पूर्णम्/असम्पूर्णम् - सम्पूर्णम्। | सम्पूर्णम्/असम्पूर्णम् - सम्पूर्णम्। | सम्पूर्णम्/असम्पूर्णम् - सम्पूर्णम्। |
| कालः - सम् १७७५(1718 A.D.) | कालः -आनु: अष्टादशशतकम् | कालः - शक १७३४(1812 A.D.) |
| उपकरणम् - हस्तनिर्मितं पत्रम् (Handmade paper) | उपकरणम् - हस्तनिर्मितं पत्रम् (Handmade paper) | उपकरणम् - हस्तनिर्मितं पत्रम् (Handmade paper) |
| हस्ताक्षरः - उत्तमः | हस्ताक्षरः - मध्यमः | हस्ताक्षरः - उत्तमः |
| पत्रसंख्या(Folio) - 34 | पत्रसंख्या(Folio) - 30 | पत्रसंख्या(Folio) - 66 |
| प्रतिपत्रं वाक्यसंख्या - 10 | प्रतिपत्रं वाक्यसंख्या - 13 | प्रतिपत्रं वाक्यसंख्या -7 |
| अवस्था -उत्तमः | अवस्था -उत्तमः | अवस्था -उत्तमः |
| परिमाणः - 22x9.5 से.मि. | परिमाणः - 23.5 x 10.5 सं.मि. | परिमाणः - 21.82x9.25 से.मि. |

**शिरोनाम ग्रन्थनाम वा :** कविः तु क्रान्तदर्शी। प्रायशः काव्यस्य ग्रन्थस्य वा प्रारम्भे कविर्ग्रन्थकारो वा ग्रन्थस्य नाम उल्लिखति। नचेत् ग्रन्थान्ते पुष्पिकांशे ग्रन्थस्य नाम तेन प्रदीयते। अतः नामकरणविषये





पुष्पिकाया महद्गुरुत्वमस्ति। "चातुर्मास्यप्रयोग" इति ग्रन्थस्य सविमर्शसम्पादनाय तिसृषु मातृकासु क-मातृका प्रथमा। तत्र मलपत्रे 'अथ चातुर्मास्यप्रयोगप्रारम्भः' इति लिखितम्। पाण्डुलेखस्य अन्ते शुनासीरीयपर्वान्ते "अथ सवनेष्टिः। आग्नेयोष्टाकपालः ऐन्द्राग्न एकादशकः। वैश्वदेवद्वादशकः। सर्वं प्रकृतिवत्। सम्वत् १७७५ शुतंगः आषाढ शुक्ल ३ समाप्तम्॥"[8] इति लिखितम्। ख-मातृकाया मलपत्रे "चातुर्मास्यप्रयोग" इति स्पष्टं लिखितम्। ग्रन्थशेषे तु 'इति चातुर्मास्यप्रयोगः' घोषितम्। 'इदं पुस्तकं मौन्योपकं नाम वैजनाथेन मौल्यं दत्त्वा गृहीत'[9] इति वाक्येन ग्रन्थसमाप्तिर्भवति। परं ग-मातृकायाः प्रारम्भे "अथ चातुर्मास्यप्रारम्भः ६५" इति वाक्यमुपलभ्यते। अत्र प्रयोगपदं न दृश्यते। पुनश्च "इति चातुर्मास्यप्रयोगः" इति वाक्येन ग्रन्थः समाप्यते। अनन्तरमुत्तरपुष्पिकांशे "चातुर्मास्य समाप्तः राम्"[10] इति लिखितम्। अतः संशयः प्रजायते यत् ग्रन्थस्यास्य नाम चातुर्मास्यप्रयोगो उत चातुर्मास्यो वा। 'इयता इदानीमपि पीडा न निष्क्रामति'। मातृकासूच्यां ग-मातृकाया उल्लेखनं 'बौधायनचातुर्मास्य" इति निर्दिष्टम्। सर्वं विचिन्त्य ग्रन्थस्यास्य नाम चातुर्मास्यप्रयोगः इति संसिध्यते।

चतुर्षु मासेषु क्रियते इति चातुर्मास्यम्। मस्-धातोरुत्तरं घञ् प्रत्यये मास इति शब्दो निष्पन्नः। मस्यते परिमीयते शरावनेनेति मस्+घञ्> मास। स एव शुक्लकृष्णपक्षद्वयात्मकः कालः। सः च पौषमाघादिद्वादशसंज्ञक इत्यमरः।[11] चातुर्मास्ययागः चतुर्भिः पर्वैः सम्पाद्य इष्टियागविशेषः। सम्वत्सरसाध्यं श्रौतकर्मेदं फाल्गुनचैत्रमासि आरभते। वर्षस्य प्रतिचतुर्थमासि एकैकं पर्व अनुष्ठीयते। क्षेत्रविशेषे अयं यागो द्वादशदिवससाध्यः, यावज्जीवनसाध्यः। तत्र चत्वारि पर्वाणि सन्ति - वैश्वदेवः, वरुणप्रघासाः, साकमेधाः शुनासीरीयश्च। पुनः प्रयोग इति पदस्य व्युत्पत्तिरेवं भवति प्र-युज्–घञ्(भावे)। M.M. Williams महोदयैरस्यार्थः अभ्यासः, पद्धतिः, क्षेपनम् इति निर्दिष्टम्।[12] प्रकृतपथे

[8] क 34a 7

[9] ख 30a

[10] ग 64b

[11] अमरकोशः 1/4/12

[12] *A Sanskrit English Dictionary* P 688

प्रयोगसाहित्यमिदं सूत्रसाहित्यात् अर्वाचीनम्। अत्र काचन एका यज्ञपद्धतिः ऋत्विगनुसारं सुष्ठु वर्णितम्। आलोच्यं मातृकात्रयं कृष्णयजुर्वेदस्य बौधायनश्रौतसूत्रमनुसरति। अतः केवलमत्र आध्वर्यवकर्म, प्रातिप्रस्थातृकर्म च निवेदितम्।

**ग्रन्थकर्ता** : "चातुर्मास्यप्रयोग" इति हस्तलिखितग्रन्थस्य तिसृषु मातृकासु ग्रन्थकर्तुर्नाम न लिखितम्। तिसृषु मातृकासु क-मातृका प्राचीना। अस्याः कालः 1774 ख्रीष्टाब्दः(सम्वत् 1774)। मध्ययुगे अनेकाः प्रयोगकारा विद्यन्ते। तेषु "प्रयोगसार" इत्यस्य ग्रन्थकर्ता केशवस्वामी प्राचीनतमः। धीमतः आपदेवस्य पुत्रैः अनन्तदेवैः चातुर्मास्यप्रयोग इति पुस्तकं कृतं परं मातृकात्रयं न तस्य प्रतिरूपम्। मुम्बाइनगरस्थ-एशियाटिक सोसाइटि इति प्रतिष्ठानात् प्राप्तः चातुर्मास्यप्रयोग(M 578) इत्यस्य ग्रन्थकर्ता कृष्णभट्टः। ग्रन्थनाम एकत्वे अपि मातृकैयं भिन्ना। *NCC* ग्रन्थे आलोच्यमानाभिर्मातृकाभिः सह अपरस्य पाण्डुलिपिचतुष्टयस्य उल्लेखः परिदृश्यते। एताः चतस्रो मातृकाः मुम्बाइविश्वविद्यालयस्य संग्रहालये संरक्षिताः इति परिज्ञायते। *A Descriptive Cotalogue of the Samskrta and Prākrta Manuscripts* इति ग्रन्थात् मातृकाचतुष्टयस्य विस्तृतं विवरणं प्राप्नोमि। तत्र ग्रन्थारम्भे बहुलं सादृश्यं परिदृश्यते। तासां ग्रन्थकर्ता शेषाचार्य इति कथितम् *A Descriptive Catalogue of the Samskrta and Prākrta Manuscripts* इति ग्रन्थे। C.G. Kashikar महाभागाः शेषाचार्यमधिकृत्य किञ्चित् आलोचितवन्तः। तेन वक्तव्यं यत् अत्र शेषो न तु व्यक्तिनाम परं सम्प्रदायनाम। गुरुपरम्परागतसदुपदेशेन सम्प्रदायो जायते। तदुक्तं सुधीभिः - 'सम्यक् प्रकर्षेण गुरुणा शिष्येभ्यः प्रदीयते इति सम्प्रदायः। असौ शेषाचार्यः अथवा शेषाचार्यसम्प्रदायो महाराष्ट्रप्रदेशे गोदावरीतीरे अवसत्। अनन्तरं षोडशशतके ते गङ्गाप्रतीरस्थं वाराणसीमागतवन्तः। तदानीं वाराणसीनगरं सारस्वतसाधनायाः प्रत्येकस्थानमिति ज्ञायते। ते विद्वांस आसन्।[13] परं भूयोभूयः प्रयत्नेनापि मुम्बाइविश्वविद्यालये संरक्षितं पाण्डुलेखचतुष्टयं न प्राप्तुं

[13] *Baudhāyana Śrautasūtra*. Ed. C.G. Kashikar. Vols. 4. Kalāmūlaśāstra Series, New Delhi: Indira Gandhi National Centre for the Arts. 2003. English. pg xxx





शक्नोमि। सर्वा मातृका इमाः "पञ्चप्रयोगरत्न" इति हस्तलिखितग्रन्थस्य अंशविशेष इति विवृतं *NCC* ग्रन्थे[14]। अमुष्य "पञ्चप्रयोगरत्न" इति ग्रन्थस्य रचयिता अपि न परिज्ञातः। आलोच्यमानस्य ग्रन्थस्य कर्ता आचार्यः शेष इति मन्ये। परं विषयेऽस्मिन् अन्यच्च गवेषणया प्रयोजनमस्ति।

**पाठप्रकृतिः** : चातुर्मास्यप्रयोग एकः प्रयोगो ग्रन्थः। अत्र बौधायनश्रौतसूत्रमनुसृत्य चातुर्मास्ययागस्य पद्धतिरानुपूर्विकं वर्णितम्। महामहोपाध्यायहरप्रसादशास्त्रीसम्पादिते *A Descriptive Catalogue of Sanskrit Manuscripts in the Govt. Collection, Vedic Manuscript* इति ग्रन्थे कथितं यत् क, ख इति मातृकाद्वयम् आश्वलायनश्रौतसूत्रमनुसति। परमिदं न यथार्थम्। ग-पाण्डुलेखस्य तालिकायां(Catalogue) ग्रन्थस्यास्य नाम "बौधायनचातुर्मास्य" इत्यनेन चिह्नितम्। परन्तु अस्याः पुष्पिकायां लिखितम् - "शके १७३४ चैत्रकृष्ण १२ गुरौ तद्दिने श्रीविश्वेश्वरनगर्यां पाराशरस्थ सदाशिवगुरोरात्मजलक्षणगुरुनेदं चातुर्मास्य आश्वलायनलिखितं"।[15] अतः संशयः संपद्यते यत् चातुर्मास्यप्रयोगो नाम हस्तलिखितग्रन्थ आश्वलायनश्रौतसूत्रमनुसरति उत बौधायनश्रौतसूत्रम्। परं तिस्रो मातृकाः प्रतोल्य अधीत्य च राद्धान्तः जायते यत् हस्तकृतं पुस्तकमिदं बौधायनश्रौतसूत्रमनुसरति। अत्र युक्तय एवं प्रदीयन्ते।

१) मातृकात्रयं प्रायेण एकाया मूलमातृकायाः प्रतिलिपिः। सामान्यानि पाठवैचित्र्याणि किल सन्ति किन्तु अमीभिरर्थभेदो न प्रजायते। ड. कुन्जुनिराजा महाभागानां मतमत्र स्मर्तव्यं यत् एका प्रतिलिपिः कदापि एकायाः मातृकाया यथायथं प्रतिकृतिं न भवितुं शक्यति।

[15] ग 64b

२) अत्र केवलमाध्वर्यवकर्माणि प्रातिप्रस्थानकर्माणि चैव लिखितम्। बौधायनश्रौतसूत्रेऽपि केवलं आध्वर्यवकर्मपद्धतिः परिलक्षिता। आश्वलायनश्रौतसूत्रे केवलं हौत्रपद्धतिर्वर्णिता। "चातुर्मास्यप्रयोग" इति ग्रन्थे तैत्तिरीयशाखानुसारं चातुर्मास्ययज्ञपद्धतिः वर्णिता।

३) प्रयोगशास्त्रे प्रायशः नितरां मन्त्रा उद्धृताः। अस्मिन् ग्रन्थे उद्धृता अधिकांशा मन्त्राः तैत्तिरीयसंहितादपि च तैत्तिरीयब्राह्मणात् संचयिताः। ततः मातृकेयं कृष्णयजुर्वेदस्य तैत्तिरीयशाखामनुसरति। इदमेव वक्तव्यं यत् बौधायनश्रौतसूत्रं तैत्तिरीयशाखाम् अनुगच्छति।

४) मातृकात्रये बौधायनश्रौतसूत्रादपि अनेकाः कारिकाः लिपिबद्धाः। यथा "यन्मे रेतः **प्रसिच्यते यन्म आप्यायते यद्धा जायते पुनः। यद्धा मे प्रतितिष्ठति तेनं मा वाजिनं कुरु तेनं मा रेतस्विनं कुरु तेनं मा शिवमाविश तस्यंते वाजिपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि** इति। निर्णिज्य पात्रं दद्युः। होतृब्रह्मणावाश्वलायनौ चेत्। **यन्मेरेतः पसिच्यते यद्धा मे अपिगच्छति। यद्धा जायते पुनः तेनं माशिव मा विश तेनं मा वाजिनं कुरु। तस्य ते वाजिपीतस्योपहूतस्योपहूतो भक्षयामीति**" इत्यंशः बौ.श्रौ.सूत्रे लभ्यते।[15] मातृकात्रये अयं कारिकांश उपलभ्यते यथा क 7a 10, 7b 1-2, ख 7a 5-7, ग 13a । अत्र विद्यन्ते अनेकानि उदाहरणानि।

**ग्रन्थस्य पाठः** चातुर्मास्यप्रयोग इति ग्रन्थस्य ग्रन्थकारेण बौधायनश्रौतसूत्रमनुसृत्य ऋत्विककर्माणि वर्णितानि। न तु चातुर्मास्ययागस्य व्याख्या, विश्लेषणं, फलानि परं ग्रन्थकारोऽत्र यज्ञपद्धतिं वर्णितवान्। विघ्ननाशकं पार्वतीसुतं गजाननं नमस्कृत्य चातुर्मास्यप्रयोग आरभते।

[16] *Baudhayana Srautasutra*. Ed. C.G. Kashikar. Vols. 4. Kalamulasastra Series, New Delhi: Indira Gandhi National Centre for the Arts, 2003. English. Chapter-4, p 236





**मातृकात्रयाणां कानिचित् वैशिष्ट्यानि :** १) चातुर्मास्यप्रयोग इति ग्रन्थस्यास्य सविमर्शसम्पादनार्थं प्रयुक्ते मातृकात्रये स्ववैशिष्ट्ये दीप्तम्। क पाण्डुलेखे यतिचिह्नस्य असाधारणं प्रयोगो लक्ष्यते। यम्। किन्तु यति । अस्यार्थः पादविच्छेदः। यतिः तु जिह्वेष्टविश्रामस्थानम्। विश्रामस्थाने उच्चारणकालविच्छेदे अस्याः प्रयोगो भूयते। तदुक्तं -

यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते।

सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया॥

क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्वकृतिभिः

पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ॥[17]

प्रायशः संस्कृतापाण्डुलेखेषु छेद(दण्डः) इति यतिचिह्नं बहुलं व्यवह्रियते। परमत्र लिपिकारैः कौशलेन छेदस्य प्रयोगः क्रियते। यथा वाक्यान्ते एकं छेदचिह्नमनुच्छेदान्ते दीर्घच्छेदः प्रयुज्यते। अनेकत्र परिच्छेदस्य पुरतः द्विदण्डचिह्नं परिदृश्यते। अनेन नवानुच्छेदः सूच्यते। पुनः परिच्छेदावसाने दीर्घच्छेदद्वयं द्विः प्रयुज्यते। यथा "॥ ॥ संतिष्ठते वैश्वदेवपर्व॥ ॥"[18] । उपानुच्छेदोऽपि स्पष्टतया निर्देशितं लिपिकारैः। दृष्टान्तोऽत्र प्रदर्शितः " ब्राह्मणतर्पणान्तं प्रकृतिवत्। संतिष्ठत एषेष्टिः॥ ॥"

प्रागेव आलोचितं यत् प्रयोगग्रन्थे बहुविधा मन्त्रा उद्धृताः। इदानीन्तनं काले उद्धृतिचिह्नेण मन्त्रा उद्धृताः। प्राचीनकाले तु उद्धृतिचिह्नमिदं न अवलोकितमिति वदन्ति केचित् पण्डिताः। परमत्र क-मातृकायां सर्वत्र मन्त्राः तथा मन्त्रांशाः उद्धृतिचिह्नैः चिह्निताः। मन्त्रमुभयतोऽत्र बिन्दुचिह्नद्वयं प्रदीयते।[19]

[17] छन्दोमञ्जरी 1/19-20

[18] क 8a 7, ख 8a 7

मातृकात्रयस्य लिपिः देवनागरी। क-मातृकायां ख-मातृकायां च प्रयुक्तया देवनागरीलिप्या सह मध्ययुगलिपेः सादृश्यं परिदृश्यते।

लिपिकरः लिपिगतप्रमादसंशोधनाय कौशली आसीत्। कुत्रापि निविडेन कालिलेपनेन[19], कुत्रापि वा पीताभेन श्वेतवर्णेन लिपिगतानवधानता संशुध्यते। कदाचित् विशिष्टैः चिह्नैः लिपिगतः भ्रमः परिशुध्यते।

पाण्डुलिपित्रये अनेकत्र समाक्षरलोपः परिदृश्यते। यथा प्रागादिदिक् क 8a 1 > प्रागादिक्

वर्णविपर्यय एव लिपिकरस्य सामान्यः एकः सामान्यः प्रमादः।

यथा गृण्हन्ति > गृह्णन्ति, थयाचित > यथाचित ।

"मोऽनुस्वारः"[20] पाणिनीयसूत्रमिदं अनेकत्रप्रयुक्तं, कुत्रापि वा न प्रयुक्तम्। तत्र अन्यत्र सिन्धुवत् वैशिष्ट्यानि विद्यन्ते। अत्र विन्दुवत् केवलं कानिचित् वर्णितानि।

BIBLIOGRAPHY


1. *A Descriptive Catalogue of Sanskrit Manuscripts in the Govt. Collection, Vedic Manuscript*. Ed. Haraprasad Sastri. Vol. 3. Kolkata: The Asiatic Society, 2005. English.
2. *A Descriptive Catalogue of the Saṃskṛta and Prākṛta Manuscripts*. Ed. G.V. Devasthali. Vol.1. Bombay: University of Mumbai, 1944. 2 Vols. English.
3. *Āpastamba-Sāmānya-Sūtra or Yajñaparibhāṣā Sūtra*. Ed. Samiran Chandra Chakrabarti. Bibliotheca Indica Series No 328. Kolkata: The Asiatic Society. 2006. English.
4. *Āśvalāyana Śrautasūtra*. Ed. Amarkumar Chattopadhyay. Bibliotheca Indica Series No. 322, Kolkata: The Asiatic Society. 2002. Bengali.
5. Bandyopadhyaya, Shanti. *Vaidik Yager Yāgyajña*. Sanskrit Pustak Bhandar. Kolkata, Bangabda1417 (1st ed. 1395). Bengali.


[19] ख

[20] अष्टा 8/3/23






6. *Baudhāyana Śrautasūtra*. Ed. C.G. Kashikar. Vols. 4. Kalamulasastra Series. New Delhi: Indira Gandhi National Centre for the Arts. 2003. English (बौ.श्रौ.सू.)
7. Bhide, V.V. *The Cāturmāsya Sacrifice, with special reference to Hiraṇyakeśi Śrautasūtra*. Pune: University of Poona. 1979. English.
8. Dharmadhikari,T.N. Ed. *Yajñāyudhāni*. Pune: Adarsha Sanskrit Shodha Samstha, 2013(2nd ed. 1st ed. 1989). English.
9. *Gopatha Brāhmaṇa*. Ed. Tarakanath Adhikari. Calcutta: Rabindra Bharati University. 1999. Bengali. (गो.ब्रा.)
10. Goswami, Subuddhicharan. *SanskritaPuthividya, Tattva O Prayog*. Kolkata: West Bengal State Book Board, 2014. Bengali.
11. Katre,S.M. *Introduction to Indian Textual Criticism*. Poona: Deccan College. 1981(rpt. 1st ed. 1947). English.
12. Mimamsaka, Yudhisthira. *Śrauta-Yajña-Mīmāṃsā*. Calcutta: Srimati Savitridevi Bagariya Trust, 1987. Hindi, Sanskrit.
13. *Pāṇinīya Śikṣā*. Ed. Ashokekumar Banyopadhyaya. Kolkata: Sadesh, 2008. Bengali.
14. *Ramendra Rachanavali*. Ed. Brajendranath Bandopadhyaya, Sajanikanta Das. Part 3. Calcutta: Bangiya sahitya Parisat. 1324 BY. Bengali.
15. Sastri, Chinnaswami. *Yajñatattvaprakāśa*. Ed. RamanathaDikshita. Calcutta: University of Calcutta, 1951. Sanskrit.
16. Śivaśrona. *Śrauta Prayogaklpti*. Ed. Braj Bihari Chaubey. Kṛtibodha Series 2, New Delhi: National Mission For Manuscripts and D.K. Printworld (P) Limited, 2011. English.
17. Sukthankar, V.S. *Critical Studies in the Mahabharata*. Vol. 1. V.S.Sukthankar Memorial Edition, Bombay: Karnatak Publishing House. 1944. English.
18. *Taittirīya- Brāhmaṇa*. Ed. & Trans. Trishna Chatterjee. Vol. 1. Vedagranthamālā 14, Kolkata: Ramakrishna Mission Institute of Culture. 2016. 3 Vols. Bengali. (तै.ब्रा.)
19. *Taittirīya- Brāhmaṇa*. Ed. & Trans. Trishna Chatterjee. Vol. 2. Vedagranthamala 14. Kolkata: Ramakrishna Mission Institute of Culture, 2017. 3 Vols. Bengali.
20. *Taittirīya- Brāhmaṇa*. Ed. & Trans. Trishna Chatterjee. Vol. 3. Vedagranthamālā 14. Kolkata: Ramakrishna Mission Institute of Culture. 2018. 3 Vols. Bengali.
21. Thite, Ganesh Umakant. *Sacrifice in the Brāhmaṇa Texts*. Poona: University of Poona, 1975. English.


---

# जैननयेऽवधिज्ञानसमीक्षणम्

श्रीशशांकशेखरपात्रः
सहायकाध्यापकः, संस्कृतविभागः,
विद्यासागरविश्वविद्यालयः, दूरशिक्षाविभागः

**विषयसारः** 'प्रमेयसिद्धिः प्रमाणाद्धि' इति न्यायेन प्रमेयज्ञानं किमपि साधनं बिना स्वतोत्पादितं न भवति। अतः येन साधनेन प्रमेयज्ञानं जायते तत्खलु प्रमाणम्। अर्थात्प्रमीयते यथार्थज्ञानविषयीक्रियते वस्तुजातं येन तत् प्रमाणम्। येन वस्तुस्वरूपस्य निश्चयं ज्ञानं भवति तत्प्रमाणम्। अपि च दर्शनान्तरेषु प्रमाकरणं प्रमाणमिति नियमादिन्द्रियम्, इन्द्रियार्थसन्निकर्षः खलु प्रमाणं भवति। परन्तु जैननये प्रमाणं खलु ज्ञानम्। अर्थाज्जैनमते ज्ञानेन प्रमेयस्य ज्ञेयवस्तुनश्च निश्चयात्मकं ज्ञानं भवति। अतः ज्ञानमेव प्रमाणम्। जैनमते ज्ञानं दीप इव। दीपो यथा स्वयं प्रकाशकस्तथा अन्येषामपि प्रकाशको भवति। ज्ञानमिदं पञ्चविधानि भवन्ति मतिश्रुतावधिमनःपर्यायकेवलभेदेन। ज्ञानपञ्चकमिदं प्रत्यक्षपरोक्षाभ्यां प्रमाणाभ्यां विभक्तानि भवन्ति। विशदं ज्ञानं खलु प्रत्यक्षम्। विशदज्ञानं भिन्नं ज्ञानमेव परोक्षम्। प्रत्यक्षज्ञानं द्विविधा मुख्यप्रत्यक्षं पारमार्थिकप्रत्यक्षं वा, सांव्यवहारिकप्रत्यक्षञ्चेति। तत्र पारमार्थिकप्रत्यक्षज्ञानेष्ववधिज्ञानमन्यतमम्। 'लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरि'ति नियमादवधिज्ञानस्य स्वरूपम्, भेदः, विभागमिमं विषयमधिकृत्य विश्लिष्य च समग्रभावेन **'जैननयेऽवधिज्ञानसमीक्षणम्'** यथामतिः प्रस्तुयते निबन्धेऽस्मिन्।

***मूलपदानि*** *ज्ञानम्, सम्यग्ज्ञानम्, प्रमाणम्, अवधिः, प्रत्यक्षम्, परोक्षम् इत्यादीनि।*

**उपोद्घातः** 'दृशिर् प्रेक्षणे' (भ्वा.१०५६)इति प्रेक्षणार्थक–दृश्धातोःदृश्यतेऽनेनेति 'करणाधिकरणयोश्च' (पा. सू. ३.३.११७) इति सूत्रेण करणवाच्ये 'ल्युट् च' (३.३.११५) इति सूत्रेण ल्युट्प्रत्यये दर्शनमिति पदं निष्पन्नम्। यथार्थरूपेण वस्तुनः तत्त्वज्ञानं येन दृश्यते ज्ञायते वा तद्दर्शनम्। भारतीयदर्शनं द्विविधमास्तिकदर्शनं नास्तिकदर्शनञ्चेति। पाणिनीयसूत्रानुसारं 'अस्ति नास्ति दिष्टं मतिः' (४.४.६०) अस्ति इति शब्देन ठकि आस्तिकशब्दः, नास्ति इति शब्देन ठकि नास्तिकशब्दः निष्पद्यते। परन्त्वत्र व्याकरणदिशा व्युत्पत्तिः द्वयोः शब्दयोः न प्रयोज्या।[१] स्मृतिकारमनुमते

'योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः॥'[२]

एतेन स्पष्टं प्रतीयते यद्वेदप्रामाण्यमस्तीति मतिर्यस्य स आस्तिकः. वेदप्रामाण्यं नास्तीति मतिर्यस्य स नास्तिकः। अर्थाद्भारतीयदर्शने यानि दर्शनानि वेदप्रामाण्यं स्वीकुर्वन्ति तान्यास्तिकदर्शनानि, यानि न स्वीकुर्वन्ति तानि नास्तिकदर्शनानि। आस्तिकदर्शनं खलु षड्विधं न्यायवैशेषिकसांख्ययोगपूर्वमीमांसोत्तरमीमांसाभेदेन। नास्तिकदर्शनं खलु त्रिविधं चार्वाकजैनबौद्धभेदेन। नास्तिकदर्शनेषु जैनदर्शने ज्ञानपञ्चकेष्ववधिज्ञानमुरःरीकृत्य 'जैननयेऽवधिज्ञानसमीक्षणम्' इति शीर्षको निबन्धः प्रस्तुयते।

**प्रमाणस्वरूपम्** जैनदर्शने आगमसाहित्ये सर्वादौ प्रमाणमालोचितम्। सर्वादौ भगवता तत्त्वार्थसूत्रकारेण उमास्वातिमहोदयेन ज्ञानं प्रमाणत्वेन स्वीकृतम्।[३] ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्यायकेवलभेदेन।[४] तानि परोक्षप्रत्यक्षाभ्यां द्विविधम्। मतिश्रुते ज्ञाने खलु परोक्षम्।





अवधिमनःपर्यायकेवलानि खलु प्रत्यक्षम्। तत्त्वार्थसूत्रकारमते एतानि ज्ञानानि खलु प्रमाणानि भवन्ति। तदुत्तरकाले परवर्तिभिः दार्शनिकैः मतमिदं स्वीकृत्य प्रमाणत्वेन ज्ञानप्रपञ्चं व्याख्यायते। प्रमाणपरीक्षा इति ग्रन्थे सम्यग्ज्ञानमेव प्रमाणमिति उद्घोषितम्।[५] भारतीयदर्शने सर्वैः दार्शनिकैः प्रमायाः करणमित्यर्थे प्रमाणं स्वीकृतम्। परन्तु प्रमायाः करणविषये दार्शनिकेषु वैमत्यं परिलक्ष्यते। न्यायदर्शने इन्द्रियम्, इन्द्रियार्थसन्निकर्षः, निर्विकल्पकज्ञानं प्रमाणं भवति।[६] जैनमते इन्द्रियादि प्रमाणं भवितुं नार्हति तेषामप्राप्यकारित्वात्।[७] सूक्ष्मदूरस्थितविप्रकृष्टवस्तूनां इन्द्रियेन सह सन्निकर्षाभावादिन्द्रियार्थसन्निकर्षः प्रमाणं न भवति।[८] अपि च निर्विकल्पकज्ञानेन व्यवहारजनकाभावान्न प्रमाणम्।[९] जैनमते ज्ञानमेव प्रमाणम्। अपि च जैनमते ज्ञानं यथा प्रमा तथैव प्रमाणमपि भवति। विषयोऽयं दीपकदृष्टान्तेन व्याख्यातो जैनदार्शनिकैः। दीपको यथा स्वस्य प्रकाशकस्तथा अन्येषामपि प्रकाशको भवति। इत्थं ज्ञानमपि स्वयं प्रकाशनमन्येषां प्रकाशनञ्च भवति। न्यायदर्शने यथा प्रमाप्रमाणयोर्मध्ये कार्यकारणसम्बन्धः परिलक्ष्यते तादृशः सम्बन्धः जैनदर्शने न परिलक्ष्यते प्रमाप्रमाणयोरभेदात्। इत्थं जैनदर्शने ज्ञानमेव प्रमाणं न त्विन्द्रियादि। हेमचन्द्राचार्येण प्रमाणमीमांसा इति ग्रन्थे उक्तं यत्सम्यगर्थस्य निश्चयात्मकं ज्ञानमेव प्रमाणम्।[१०] लक्षणघटकथितस्य सम्यक् इति पदेन विमोहसंशयविपर्ययज्ञानानि निरस्तानि।[११] अर्थः खलु हानोपादानोपेक्षाबुद्धेः विषयः।[१२] निर्णय इति पदेन संशयानध्यवसायविकल्परहितं ज्ञानं विवक्षितम्।[१३] इत्थं जैननये सम्यग्ज्ञानमेव प्रमाणम्। किं तावत्सम्यग्ज्ञानस्वरूपमित्याकाङ्क्षायामुक्तं यद्यद्वस्तु यदृशं तस्य तादृशं ज्ञानमेव सम्यग्ज्ञानम्। माधवाचार्येणोक्तं सर्वदर्शनसंग्रहे

'यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः।'[१४]

सम्यग्ज्ञानं यदा स्वपरप्रकाशनं बाधवर्जितं भवेच्चेत्तत्प्रमाणम्।[१५]

**प्रमाणविभागः** प्रमाणं द्विविधं परोक्षं प्रत्यक्षञ्चेति।[१६] इन्द्रियस्य मनसश्च साहाय्येन जायमानं ज्ञानं हि परोक्षप्रमाणम्।[१७] ज्ञानपञ्चके मतिश्रुतज्ञानं परोक्षप्रमाणम्। यद्यपि भगवता उमास्वातिवाचकाचार्येण परोक्षप्रमाणे मतिज्ञानस्यान्तभावः स्वीकृतः, परन्तु तत्परवर्तिनि काले जैनदार्शनिकैः अकलङ्कदेवप्रमुखैः लोकव्यवहारादिन्द्रियमनसाभ्यां जन्यस्य मतिज्ञानस्य परिगणनं प्रत्यक्षप्रमाणे कृतम्। अपि चेन्द्रियस्य मनसश्च साहाय्यं विना जायमानं ज्ञानं प्रत्यक्षप्रमाणम्।[१८] प्रत्यक्षप्रमाणं द्विविधं सांव्यवहारिकं पारमार्थिकञ्चेति।[१९] संव्यवहारो बाधारहितप्रवृत्तिनिवृत्ती प्रयोजनमस्येति सांव्यवहारिकम्। यथा अस्मदादिप्रत्यक्षम्। बाह्येन्द्रियसामग्रीसापेक्षरहितं पारमार्थिकम्। पारमार्थिकस्य नामान्तरं मुख्यम्। अत्र केवलमात्मसन्निधिमात्रमपेक्षते। यथा अवध्यादिप्रत्यक्षम्।[२०] भट्टाकलङ्केन मुख्यप्रत्यक्षेऽवधिज्ञानं परिगण्यते। परन्तु प्रमाणपरीक्षा इति ग्रन्थे वादिदेवेन पारमार्थिकं द्विविधं सकलविकलभेदेन[२१] विभज्य विकलेष्ववधिज्ञानं स्वीकृतम्।[२२] केचन प्रत्यक्षं द्विविधं वदन्ति। यथा देशप्रत्यक्षं सर्वप्रत्यक्षञ्चेति। अवधिमनःपर्यायज्ञानं देशप्रत्यक्षम्। इत्थं सर्वशाकुल्येन मुख्यप्रत्यक्षं पारमार्थिकप्रत्यक्षं वा त्रिविधमवधिमनःपर्यायकेवलभेदेन। साम्प्रतमवधिज्ञानस्वरूपं तद्भेदा इत्येते विषयाः व्याख्यायते।

**अवधिज्ञानस्वरूपम्** 'अव समन्ताद् द्रव्यादिभिः परिमितत्वेन धीयते ध्रियते विषयः अनेनेत्यवधिः। ज्ञानप्रतिबन्धकाभावे बुहुविषयां ग्रहणमवधिज्ञानेन भवति। अवधिज्ञानं इन्द्रियमनसोः साहाय्यं विना केवलमात्मसन्निदानेन ज्ञानावरणस्य क्षयोपशमे सति आत्मनि जायते। अनेन ज्ञानेन रूपवतः द्रव्यस्य भिन्नानां पर्यायाणां ज्ञानं भवति।[२३] जैनमते ज्ञानं खलु चैतन्यस्य गुणः। यद् बाह्यिककारणजन्यं न भवति। यथा केवलज्ञानम्। न्यायमते ज्ञानं बाह्यिकाभ्यन्तरकारणाभ्यां जातं तथा बौद्धस्वीकृतं क्षणिकं न भवति। बौद्धमते वस्तु जन्मनः परं विनश्यति।[२४] परन्तु न्यायमते वस्तूनः जन्म, स्थितिः,ध्वंसः इत्येताः अवस्थाः परिलक्ष्यन्ते।[२५] अपि च न्यायमते आत्मनः सुषुप्त्यवस्थायां

